आदित्यहृदयस्तोत्र Adityahṛdayastotra

No. 822 454. / 1883-84.

Size.-- $5\frac{3}{4}$ in. by 4 in.

Extent.-- 27 leaves ; 7 lines to a page ; 16 letters to a line.

Description.— Modern paper with water-marks, but much discoloured and worn-out ; Devanāgarī characters ; hand-writing bold, legible and uniform ; borders ruled with double black lines ; complete.

Age.— Modern copy.

Author.— Not mentioned.

Subject.— Stotra from the Bhaviṣyottara Purāṇa.

Begins.— fol. 1[a]

श्रीगणेशाय नमः ॥ श्रीसूर्यनारायणाय नमः॥
शतानीक उवाच ॥
कथमादित्यमुद्यंतमुपातिष्टेत्सनातनं ॥ etc.

Ends.—fol. 27[a]

उदयगिरिमुपेतं भास्करं पद्महस्तं
सकलभुवननेत्रं रत्नरत्नोवधेयं ॥
तिमिरकरमृगेंद्रं बोधकं पद्मिनीनां
सूरवरमभिवंदे सुंदरं विश्वरूपं ॥ ६४ ॥
इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं
संपूर्णमस्तु ॥ ७ छ ।

References.— See No. 820.

आदित्यहृदयस्तोत्र Adityahṛdayastotra

No. 823 453. 1883-84.

Size.—$6\frac{5}{8}$ in. by $4\frac{7}{8}$ in.

Extent.— 18 leaves; 10 lines to a page; 18 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear, legible and uniform; folios without border-lines; complete.

Age.— Appears to be fairly old.

Author.— Not mentioned.

Subject.— Stotra from the Bhaviṣyottarapurāṇa.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥

शतानिक उवाच ॥

कथमादित्यमुद्यंतमुपतिष्ठेत्सनातनं ॥
एतन्मे ब्रूहि विप्रेंद्र प्रपद्ये शरणं तव ॥ १ ॥ etc.

Ends.—fol. 18[b]

एतत्ते कथितं पार्थह्यादित्यहृदयं मया ।
न तस्य सदृशं स्तोत्रं लोकानां पावनं परं ॥ ८ ·
अन्यथा शरणं नास्ति त्वमेव शरणं मम
तस्मात्कारुण्यभावेन रक्ष रक्ष परमेश्वर

दिवाकर ॥ न्यूनातिरिक्तानि परिस्फुटानि
यानीह कर्माणि मया कृतानि
क्षम्याणि चैतानि मम क्षमस्व
प्रयाहि तुष्टः पुनरागमाय ॥ ३१ ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णं ॥ शुभं भवतु ॥ छ छ ॥

References.— See No. 820.

आदित्यहृदयस्तोत्र — Adityahṛdayastotra

No. 824 — 61. / 1919-24.

Size.— $6\frac{3}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 41 leaves; 5 lines to a page; 16 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing clear, legible and fairly correct; text bounded on all sides with beautiful decorated lines; yellow pigment used for corrections; complete.

Age.— Śaka 1693 (= A. D. 1771).

Author.— Not mentioned.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥

शतानीक उवाच ॥

कथमादित्यमुद्यंतमुपतिष्टेत्सनातन ॥
एतन्मे ब्रूहि विप्रेंद्र प्रपद्ये शरणं तव ॥ १ etc

Ends.— fol. 41[a]

अग्न आयाहि वीतये नमस्ते ज्योतिषां पते
शन्नो देवी नमस्तुभ्यं जगच्चक्षुर्नमोस्तुते ७८
सौख्यमायुष्यमारोग्यं लभते मोक्ष एव च ॥
विश्वदीप नमस्तुभ्यं नमस्ते जगदात्मने ॥ ७९ ॥
यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ॥
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ८० ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णं श्रीसूर्यनारायणार्पणमस्तु ॥

शके १६९२ खर नाम संवत्सरे फाल्गुन शुद्ध पंचमी ॥

References.— See No. 820.

आदित्यहृदयस्तोत्र Ādityahṛdayastotra

No. 825 149. 1884-87.

Size.— 5 in. by $6\frac{1}{8}$ in.

Extent.— 30 leaves; 10 lines to a page; 10 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing very bold, legible and uniform; borders ruled with double pink lines; complete.

Age.— Appears to be fairly old.

Author.— Not mentioned.

Subject.— Stotra from the Bhaviṣyottarapurāṇa.

Begins.— fol. 1[a]

॥ श्रीलक्ष्मिव्यंकटेश प्र ॥०॥
श्रीगणेशाय नमः ॥ अर्जुन उवाच ॥
ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा ॥
मया कृष्ण परिज्ञातं वाङ्मयं सचराचरं ॥ १ ॥
सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव ॥
यज्ज्ञात्वा मुच्यते जंतुर्जन्ममृत्युजरादिभिः ॥ २ ॥ etc.

Ends.— fol. 64[a]

शंनो देवी नमस्तुभ्यं जगच्चक्षुर्नमोनमः ॥
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥
सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥५२॥
आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने
जन्मांतरसहस्रेषु दारिद्र्यं नोपजायते ॥ ५३ ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्र संपूर्णमस्तु ॥ शुभंमस्तु श्रीरस्तु ॥ श्रीसवितासूर्यनारायणार्पणमस्तु ॥ छ ॥ छ॥

References.— See No. 820.

आदित्यहृदयस्तोत्र Adityahṛdayastotra

No. 826 96. 1884-87.

Size.— $5\frac{7}{8}$ in. by 4 in.

Extent.— 26 leaves ; 8 lines to a page ; 36 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear and legible but not uniform ; borders ruled with double red lines ; complete.

Age.— A modern copy.

Author.— Not mentioned.

Subject.— A stotra from the Bhaviṣyottarapurāṇa.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥ श्रीकनकादित्याय नमः

शतानीक उवाच

कथमादित्यमुर्यंतमुपतिष्ठेत्सनातनं ॥

यन्मे ब्रूहि तस्तोत्रं प्रपये तं शरण्यंग ॥ १ ॥ etc.

Ends.—fol. 25[b]

उदयगिरिमुपेतं भास्करं पद्महस्तं

सकलभुवननेत्रे रत्नरत्नोपमेयं ॥

तिमिरकरिमृगेंद्रं बोधकं प्रनीनां

सुखकरमभिवंदे सुंदरं विश्ववंद्यं ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णं ॥ श्रीसूर्यनारायणार्पणमस्तु ॥ श्रीकनकादित्याय नमः ॥ ॥

सर्यनारायणप्रीयतां ॥ छ ॥ छ ॥

References.— See No. 820.

आदित्यहृदयस्तोत्र Ādityahṛdayastotra

No. 827 587 (vi). 1892-95.

Size.— $9\frac{1}{3}$ in. by $4\frac{3}{4}$ in.

Extent.— 6^b to 17^b leaves ; 10 lines to a page ; 24 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing bold and legible ; verse-numbers marked with red pigment ; complete.

Age.— Fairly old.

Author.— Not mentioned.

Begins.— fol. 6^b

श्रीसूर्याय नमः ॥ श्रीसूर्याय नमः ॥ ॐ नमः सवित्रे ॥
अर्जुन उवाच ॥
ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा
मया कृष्ण परिज्ञेयं वाङ्मयं सचराचरं १
सूर्य··· ·· स्तु मयं न्यासं वक्तुमर्हसि माधव ॥
भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः ॥ २ ॥
सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् ।
तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥ ३ ॥ etc.

Ends.— fol. 17^b

आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने ।
जन्मांतर सहस्रेषु दारिद्रं नोपजायते ॥ १४७ ॥
उदयगिरिमुपेतं भास्करं पद्महस्तं ॥
सकलविबुधनेत्रं सर्वरत्नोज्वलांगं ॥
तिमिरगजसृगेंद्रं बोधनं प...नीनां ।
सुरवरमभिवंदे सुंदरं विश्वरूपं ॥ १५० ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णं समाप्तं ॥

References.— See No. 820.

आदित्यहृदयन्यासवर्ण-पूजास्तोत्र

Ādityahṛdayanyāsavarṇa-pūjāstotra

No. 828

145.
A 1881–82.

Size.— $5\frac{7}{8}$ in. by 4 in.

Extent.— 10 leaves ; 9 lines to a page ; 15 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear, legible, uniform and correct ; borders ruled in double red lines.

Age.— A modern copy.

Author.— Not mentioned.

Begins.— fol. 1[a]

श्रीगणाधिपतय नमः ॥ श्रीगुरुभ्यो नमः ॥
अस्य श्रीआदित्यहृदयन्यासावर्णपूजास्तोत्रमंत्रस्य । श्रीकृष्णपरब्रह्मऋषिः ॥
अनुष्टुप् बृहति जगत्यौ छंदांसी ॥ श्रीसूर्यनारायणो देवता etc.

Ends.— fol. 10[b]

देव देव नमस्तुभ्य प्रातरुत्थाय चार्जुन ॥
विघ्नान्यनेकरूपाणि नश्यंति स्मरणादपि ॥ ११ ॥
तस्मात्सर्वप्रयत्नेन सूर्यमाराधयेत्सदा ॥
आदित्यहृदयं नित्यं जाप्यंतछणु पांडव ॥ १२ ॥
यज्जपान्मुच्यते जंतुर्दारिद्र्यादाशु दुस्तरात्
अस्य श्रीआदित्यहृ—

आलमन्दारस्तोत्र
(also called) **नाथस्तुति**

Ālamandārastotra
(also called) Nāthastuti

No. 829

98.
A 1882–83.

Size.— $8\frac{1}{4}$ in. by $4\frac{1}{4}$ in.

Extent.— 8 leaves ; 8 lines to a page ; 28 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old and discoloured ; hand-writing clear, legible and uniform ; verse-numbers and folio-numbers marked with red pigment ; folio no. 1 much damaged, however it is slightly mended with paper slips ; fairly correct ; complete.

Age.— Appears to be old.

Author.— Yāmunācārya.

Begins.— fol. 1^{b}

श्रीमते यामुनाचार्य्याय नमः

स्वादयन्निह सर्वेषां श्रयंतार्थं सुदुर्ग्गहं ।
स्तोत्रयामास योगींद्रस्तं वन्दे यामुनाह्वयं ॥ १ ॥
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥ २ ॥ etc.

Ends.— fol. 8^{a}

अकृत्रिमत्वच्चरणारविंद-
प्रेमप्रकर्षावधिमात्मवंतं ।
पितामहं नाथ मुनिं विलोक्य
प्रसीद मद्वृत्तिमचिंतयित्वा ॥ ६८ ॥
यत्पादांभोरुहध्यानाविध्वस्ताशेषकिल्बिषः ।
वस्तुतामुपयातोहं यामुनेयं नमामि तं ॥ ६९ ॥

इति श्रीयामुनाचार्य्यविरचितायां आलमंदार समाप्तं ॥
श्रीरामाय नमो नमः ॥ ० ॥ ० ॥

References.— Mss.-Aufrecht's Catalogus Catalogorum :—
I, 54^{a} ; II, 10^{b} ; III, 12^{b}.
Descriptive Catalogues :—
Govt. Ori. Mss. Catalogue, Madras
Vol. XVIII, Nos. 10429-10441.
Vol. XVII, No. 9008.

आ(ल)मंदारस्तोत्र

A(la)mandārastotra

No. 830

192 (xv).
1887-91.

Size.—$5\frac{3}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 1[a] to 27[a] leaves ; 6 lines to a page ; 11 letters to a line.

Description.— See विष्णोर्दिव्यसहस्रनाम No. 192 (i). 1887-91.

Age.— Fairly old.

Begins.— fol. 1[a]

श्रीगणेशाय नमः ॥
स्वादयन्निह etc. as in No. 829

Ends.— fol. 26[b]

अकृत्रिमत्वच्चरणारविंद etc. up to नमामि तं as in No. 829.
followed by इति श्रीआ(ल)मंदारस्तोत्र संपूर्णम् ॥ १८७२

References.— See No. 829.

उपमन्युस्तोत्र
or
जयशङ्करस्तोत्र

Upamanyustotra
or
Jayaśaṅkarastotra

No. 831

597.
Viśrāma (i).

Size.— $8\frac{7}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 3 leaves ; 7 lines to a page ; 25 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing bold, clear, legible and uniform ; folios discoloured ; borders ruled with two double red lines ; complete.

Age.— Does not appear to be very old.

Author.— Upamanyu.

Subject.— Stotra in praise of Śiva.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥
जयशंकरपार्वतीपते मृडशंभोशशिखंडमंडनं ।
मदनांतकभक्तवत्सलप्रियकैलासदयासुधांबुधे ॥ १ ॥
सदुपायकथास्वपंडितो हृदयेदुःखशरेणखंडितः ॥
शशिखंडशिखंडमंडनं शरणं यामि शरण्यमीश्वरं ॥ २ ॥etc.

Ends.— fol. 3[b]

उपमन्युकृतं स्तवोत्तमं प्रजपेयस्तु शिवस्य सन्निधौ ॥
शिवलोकमवाप्य सोचिरात्सहते नैव शिवेन मोदते ॥ १९ ॥
इति उपमन्युकृत शिवस्तवं संपूर्णं ॥ छ ॥

References.— Mss. Aufrecht's Catalogus Catalogorum :—
I, 68[a].

Descriptive Catalogues :—

Madras Govt. Mss. Cat. Vol. XIX, Nos. 10934 & 10935.

Printed in Bṛhatstotraratnākara p. 15.

एकलिङ्गस्तवनगद्यावलि Ekalingastavanagadyāvali

No. 832 113. / 1891-95.

Size.— $7\frac{1}{8}$ in. by $3\frac{5}{8}$ in.

Extent.— 9 leaves ; 7 lines to a page ; 24 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old but in good condition ; hand-writing legible and uniform but slightly careless ; borders ruled with double black ink ; complete.

Age.— Fairly old.

Author.—Hārita.

Begins.— fol. 1[a]

॥ श्रीगणेशाय नमः ॥ श्रीविश्वनाथाय नमः ॥
इंद्रं सर्व सुरेश्वरः कृतयुगे भक्त्यायमाराधयन्

त्रेतायां सकलाविलाशफलिनी धेनुस्तथा द्वापरे ॥
नागेशः किल तक्षकः कलियुगे हारीतनामा मुनिः
सोयं सर्वजगद्गुरोर्विजयते श्रीएकलिंग प्रभुः ॥ १ ॥

Ends.— fol. 8[b]

इति सुललितमिष्टं यस्तु हारितगद्यं
परिपठितमनोज्ञं भावयुक्तः प्रशांतः ॥
स भवति इहलोके वल्लभः सुंदरीणां
परिमितपरलोके इश्वरत्वं प्रयाति ॥ ७ ॥

इति श्रीहारितकपिमुनिकृतौ श्रीमदेकलिंगस्तवनगद्यावली संपूर्ण ॥ श्री ॥

References.— *Mss.*-Aufrecht's catalogus catalogorum, III, 16[b].
This is the only ms recorded by Aufrecht.

एकविंशतिनामकल्प — Ekaviṁśatināmakalpa

No. 833 — 955 (v). / 1884-87.

Size.— 8 in. by $4\frac{3}{4}$ in.

Extent.— 19[a] to 22[a] leaves; 14 lines to a page; 24 letters to a line.

Description:— For description see करुणालहरीस्तोत्र No. 955(1). / 1884-87.

Author.—Not mentioned.

Begins.—fol. 19[a]

अथ समयाएकविंशतिनामकल्पः ॥
शक्र उवाच—
देव देव महादेव सर्वज्ञ सर्वतत्ववित् ॥
विधिना केन सेव्येयं को वा मंत्रविशोधने ॥ १ ॥
तर्पणः स्वीकृतो मंत्रः संविदः कृपया विभोः ।
सर्वमेतद्दशेषेण सांगपांगावदस्व मे ॥ २ ॥ etc.

Ends.— fol. 22[a]

एतद्रहस्यमुदितं परमं निगूढं
कुत्रापि नैव कथनीयमिदं कदाचित् ।
उत्कंठिता तव मया न तु पूर्ववृत्त
देवि त्वया गिरिधिया प्रणिधीयतां तत् ॥ ५४ ॥

इति कुलाचाररहस्यसारतंत्रे शिवोमासंवादैत्यवधोपाये समया-
एकविंशतिनामकल्पः ॥

कचपंजर — Kacapañjara

No. 834 — 482 (ii). 1895-98.

Size.— 8 in. by $4\frac{1}{2}$ in.

Extent.— fol. 4[a] to 8[b] leaves ; 9 lines to a page ; 20 letters to a line.

Description.— For Description see गोपालहृदयस्तोत्र No. 482 (1) / 1895-98

Begins.— fol. 4[a]

श्रीसर्वेश्वरो जयति । श्रीमते निम्बार्काय नमः ॥
अग्निरुवाच ॥
अथातः संप्रवक्ष्यामि दिव्यं मंत्रोद्यपञ्जरम् ॥
सर्वाभीष्टप्रदं सद्यः सर्वोपद्रवनाशनं ॥ १ ॥ etc.

Ends.— fol, 8[b]

नानेन सदृशं किंचित्सामर्थ्यमिह विद्यते ॥
ज्ञात्वेदं कवचं गुह्यं गुरुप्राप्तं मनोजयेत् ॥
पुरश्चर्यां विना तस्य मंत्रसिद्धिर्भवेद्ध्रुवं ॥ ५२

इति श्रीब्रह्मसंहितायां त्रैलोक्यविजयगोपालमंत्रात्मकं कचपंजरं संपूर्ण

कर्पूरस्तव Karpūrastava

No. 835 956. 1884-87.

Size.— $6\frac{1}{2}$ in. by 4 in.

Extent.— 7 leaves ; 7 lines to a page ; 18-20 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear ; legible and uniform ; borders in double black lines carelessly ruled ; right-hand corner of folios damaged ; complete.

Age.— Appears to be fairly old.

Author.— Ascribed to Vīrabhadra.

Subject.— Stotra from the Vīratantra.

Begins.— fol. 1[b]

श्रीशामायै नमः ॥ ॐ
कर्पूरं मध्यमांत्यस्वरपरिरहितं सेंदुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधुत्रिःक्रतं ये जपंति ॥
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः
स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिं गतानां ॥ १ ॥ etc.

Ends.—fol. 7[a]

कुरंगाक्षीवृंदं तमनुसरति प्रेमतरलं
वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ॥
रिपुः कारागारं कलयति च तत्केलिकलया
चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः । २२
इति श्रीवीरतंत्रे श्रीमद्वीरभद्रोक्तं कर्पूरस्तवं ॥

References.— Mss. Aufrecht's catalogus catalogorum.— I, 82[b] ; II, 15[b] ; III, 18[a].

कर्पूरस्तव Karpūrastava

No. 836 963. 1891-95.

Size.— $6\frac{3}{8}$ in by $4\frac{7}{8}$ in.

Extent.— 5 leaves; 11 lines to a page; 18 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing clear; uniform and correct; borders in double red lines carelessly ruled; complete.

Age.— Saṁvat 1838 (= A. D. 1782).

Author.— Vīrabhadra.

Begins.— fol. 1[b]

॥ ६७ ॥ श्रीगणेशाय नमः ॥

कर्पूरं मध्यमांत्यस्वरपररहितं etc. as in No. 835

Ends.—fol. 5[a]

कुरंगाक्षी वृंदं etc. up to प्रभवति स भक्तः प्रतिजनुः ॥ २२ ॥ as in No. 835

followed by इति श्रीवीरतंत्रे महाकालकृतं कर्पूरस्तवः संपूर्ण ॥

श्री इति ते कथितं स्तोत्रं १ सर्वसिद्धिः प्रवर्त्तकः ॥ १

ऐतज्ञात्वा दक्षिणायां स्तवं जानाति नानिथा

इति महाकालवीर्यस्तोत्र ॥ संवत् १८३८ ॥ ज्ये. व. १२ अर्कवासरे लि. रतीराम पठनार्थं स्वयं

References.— See No. 835.

कर्पूरलहरीस्तोत्र — Karpūralaharīstotra

No. 837 — 466. 1891–95.

Size.— $6\frac{3}{8}$ in. by $4\frac{1}{8}$ in.

Extent.— 5 leaves; 9–10 lines to a page; 20–22 letters to line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear and legible but some what careless; borders in double black lines carelessly ruled; complete.

Age.— Saṁvat (?) 1743 (=A. D. 1687).

Author.— Not mentioned.

Begins.— fol. 1[b]

॥ श्रीगुरुर्जयति ॥

कर्पूरं मध्यमांतस्वरपररहितं etc. as in No. 835.

Ends.— fol. 5[a]

कुरंगाक्षी वृंदं etc. up to प्रभवति स भक्तः प्रतिजनुः ॥ २२ ॥
as in No. 835.

followed by इति श्रीकर्पूरलहरीस्तोत्रं संपूर्णं ॥

श्रीरामांबुधिसप्तेंदुमितेब्दे मासि कार्तिके ॥
पुरे नटाभिधे देवकृष्णेनालेखि सत्स्तुतिः ॥ १७४३ ॥
श्रीगुरुर्जयति ॥

References.— Mss. Aufrecht's Catalogus Catalogorum :—
III, 18[a].

This is the only Ms recorded by Aufrecht.

करुणालहरी — Karuṇālaharī

No. 838 — 132. / 1882-83.

Size.— $8\frac{1}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 9 leaves ; 8 lines to a page ; 20 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing bold, legible and uniform ; borders in double black lines carelessly ruled ; complete.

Age.— Saṁvat 1793 (= A. D. 1737).

Author.— Jagannātha.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥

निषीदतानाथ विषानलोपमे
विषादभूमौ भवसागरे हरे ॥
परं प्रतीकारमपास्यताधुना
मयायमात्मा भवते निवेदितः ॥ १ ॥ etc.

Ends.—fol. 9[b]

सुरश्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयो-
र्विधायांतर्द्वारामथ सपदि विद्राव्य विषयान् ॥
विधौतांतर्ध्वांतो मधुरमधुरायां चितिकदा
निमग्नःस्यां कस्यां च नतवनभस्यांबुदरुचि ॥ ५४ ॥
इति श्रीजगंनाथविरीचितायां करुणालहरी संपुर्णं ॥
संवत १७९३ वा० स० १६५७ प्र० द० श्री० कार्त्तिक शुदी ७ शुक्रे०
व० वा० व्या० गोरासुतजीवने नमीदंपु० ॥

References.— Mss.-Aufrecht's Catalogus Catalogorum :—
I, 82[a] ; II, 15[b].

Aufrecht says :—" Karuṇālaharī some times called Viṣṇu-laharī, by Jagannātha Paṇḍitarāja ".

The present Ms is recorded by Aufrecht.

करुणालहरीस्तोत्र — Karuṇālaharīstotra

No. 839 — 955 (i). 1884-87.

Size.— 8 in. by $4\frac{3}{4}$ in.

Extent.— 8[a] to 9[a] ; 12 lines to a page ; 24 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old and slightly worn out ; folios 1-7 missing ; hand-writing closely written but clear, legible and uniform ; borders of some folios ruled in double black lines ; the Ms contains the following stotras :—

(1) करुणालहरीस्तोत्र foll. 8[a] to 9[a]
(2) अष्टोत्तरशतनामस्तव ,, 9[a] ,, 12[b]
(3) -Do- ,, 12[b] ,, 15[b]
(4) समयास्तव ,, 15[b] ,, 19[a]
(5) एकविंशतिनामकल्प ,, 19[a] ,, 22[a]
(6) भद्रकालीस्तव ,, 22[a],, 25[a]
(7) रजस्वलास्तोत्र foll. 25[a]to26[a]
(8) भैरवोक्तदशक ,, 26[a] ,,27[a]
(9) त्रिसंध्यदुःखध्वंसनस्तव,, 27[a] ,,28[a]
(10) महाकालसहस्रनामस्तव,, 28[a],,35[b]
(11) कालिकाचतुश्लोकीस्तव , 35[b],,36[b]
(12) कालीभुजङ्गप्रयात ,, 36[b],,37[b]

Age.— Appears to be fairly old.

Author.— Ascribed to Vaśiṣṭha.

Begins.— abruptly fol. 8[a]

.. अवलंबनमीक्षते न देही तव दीनार्त्ति हरेति यत्प्रसिद्धिः ॥ १६ ॥
कर्मजकल्मषदग्धं विलपंत क्षुधार्दिव बालं ॥
दृष्ट्वा क्षणमपि जननी परित्यक्तुं न सहते दुष्टचित्तापि ॥ १७ ॥ etc.

Ends.— fol. 9[a]

त्वं सुखदाऽसुखदा वा धनदा धर्मसुधर्मदास्त्रिलोके ।
त्वं भवदाभवबंधनमोक्षकरीति च कथ्यते मुनींद्रैः ॥ २१ ॥
इति श्रीवासिष्ठमुनिप्रणीतसर्वशक्तिसाधारणं करुणालहरीस्तोत्रं

References.— Mss. Aufrecht's Catalogus Catalogorum :—
II, 15[b].
This Ms is recorded by Aufrecht.

कालिकाचतुःश्लोकीस्तव — Kālikācatuḥślokīstava

No. 840 — 955 (xi). 1884-87.

Size.— 8 in. by $4\frac{3}{4}$ in.

Extent.— 35[b] to 36[b] ; 14 lines to a page ; 24 letters to a line.

Description.— For description see करुणालहरी No. 839.

Author.—Not mentioned.

Begins.— fol. 35^b

अथ कालिकाचतुःश्लोकीस्तवः ॥

कल्पद्रुमवने रम्ये रत्ने सिंहासनोपरि ।
उमया सहितं देवं पप्रच्छुर्नंदिकेश्वरः ॥ १ ॥

नंदिकेश्वर उ° ॥

देव देव जगन्नाथ पृच्छामि परमेश्वर ।
केन कायकरिषुद्धि प्रकाशयति निश्चितं ॥ २ ॥ etc.

Ends.— fol. 36^b

अष्टम्यां च चतुर्दश्यां संक्रांतौ ग्रहणेशु च ॥
भौमवारे पठेयस्तु जीवन्मुक्तो न संशयः ॥ ११ ॥
इदं रहस्यं परमं गोपनीयं प्रयत्नतः ॥ ११ ॥
देयं शिष्याय भक्ताय नाभक्ताय कदाचन ॥ १२ ॥

इति श्रीकुलाचारचंद्रोदये कालिकायाः श्रुतुःश्लोकीस्तवः ॥

कालीभुजंगप्रयात — Kālibhujangaprayāta

No. 841 — 955 (xii). 1884-87.

Size.—8 in. by $4\frac{3}{4}$ in.

Extent.— 36^b to 37^b ; 14 lines to a page ; 24 letters to a line.

Description.— For Description, see करुणालहरीस्तोत्र, No. 839.

Author.—Not mentioned.

Begins.— fol. 36^b

अथ कालीभुजंगः ॥

कालीकैवल्यकांती कलिकलुषमहामूलमुत्खातिनीं किं
किंवा पद्मालया सा त्रिभुवनजननी पाति विश्वं स्वभावात् ॥
सृष्ट्यादिः सृष्टिकर्त्री विलसति वसुधा योगिनीवृंदमध्ये
पश्चात्कुक्षौ समग्रं वहति च भुवनं स्वेच्छयाऽनेकरूपा ॥ १ ॥ etc.

Ends.— fol. 37[b]

यदि ध्यानपूर्वं जपेद्यो मनुष्य-
स्तदा सर्वविद्या विशालो भवेद्धि
गृहे चाष्टसिद्धिर्मृते चैव मुक्तिः
स्वरुपं त्वदीयं न विंदंति देवाः ॥ १२ ॥

इति रुद्रयामले **कालीभुजंगप्रयातः** ॥ सदाशिवस्मरणं ॥ शुभं भवतु ॥

काशीविश्वनाथस्तोत्र — Kāśiviśvanāthastotra

No. 842 — 330. / 1884–87.

Size.— $9\frac{3}{4}$ in. by 5 in.

Extent.— 4 leaves; 9 lines to a page; 28 letters to a line.

Description.—Country paper; Devanāgarī characters; in good condition; hand-writing clear, legible and uniform; borders ruled with double red lines and edges in single; complete.

Age.— Appears to be fairly old.

Author.— Śaṁkarācārya.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥

कंठे यस्य लसत्करालगरलं गंगाजलं मस्तके
वामांगे गिरिराजराजतनया जाया भवानी सती ॥
नंदीस्कंधगणाधिराजसहितः श्रीविश्वनाथप्रभुः
काशीमंदिरसंस्थितोखिलगुरुर्देयात्सदा मंगलं ॥ १ ॥

Ends.— fol. 4[a]

यः प्रातः प्रयतः प्रसन्नमनसा प्रेमाप्रमोदाकुलः
ख्यातं तत्र वसिष्टपादभुवनं इंद्रादिभिर्यस्तुतं ॥
प्रातः प्राङ्मुखमासनोत्तमगमद्भूयावृणोयादरात्
काशीवासमुखान्यचाथ सततं पीते विशे धूर्जटे ॥ २३ ॥

इति श्रीशंकराचार्यविरचितं **काशीविश्वनाथस्तोत्रं** संपूणम

References.— Mss. Aufrecht's Catalogus Catalogorum :—
II, 21[a].

Descriptive Catalogues :—
A. S. B. Catalogue Vol. VI, No. 5619.

कृष्णस्तोत्र Kṛṣṇastotra

No. 843 123. 1891–95.

Size.— $9\frac{7}{8}$ in. by $4\frac{3}{4}$ in.

Extent.— 5 leaves ; 9 lines to a page ; 32 letters to a line.

Description.—Country paper ; Devanāgarī characters ; hand-writing beautiful, legible and uniform ; numerous marginal notes on folios 1-3 ; complete.

Age.— Does not appear to be very old.

Author.— Chavinātha.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥
गणेशं च गुरुं व्यासं शिवं विष्णुं प्रजापतिं ॥
धर्मं च भास्करं ध्यात्वा नरा यांति परां गतिं ॥ १ ॥ etc

Ends.—fol. 5[a]

कृष्ण कृष्ण हृषीकेश कृष्ण कृष्ण जनार्दन ॥
कृष्ण कृष्ण भवध्वांत संत्रस्तं रक्ष रक्ष मां ॥ ६६ ॥
गुरोर्निशाकरात्प्राप्य पाठकाद्ज्ञानमैश्वरं ॥
निर्मितं छविनाथेन स्तोत्रं देवमयं महत् ॥ ६७ ॥
गोविन्दाशात्मनेदं सर्वदेवमयं शुभं ॥
रचितं छविनाथेन स्तोत्रं पापप्रणाशनं ॥ ६८
दिव्यं देवमयं स्तोत्रं गीतारससुखप्रदं ॥
ये पठिष्यंति सद्भक्त्या ते यास्यन्ति परं पदं ॥ ६९ ॥

श्रोष्यंति ते पठिष्यंति स्तोत्रं देवमयं भुवि ॥
यास्यंति ते जना भक्त्या वैष्णवं पदमव्ययं ॥ ७० ॥
वागीशग्रामसंस्थेनावस्थ्यकेन शुभात्मना ॥
कृतं देवमयं स्तोत्रं छविनाथेन सर्वदं ॥
यस्यांघ्रिपद्मं मुनयः स्मरंति
यन्मायया भाति जगद्विसृष्टं ॥
तमीशमाद्यं पुरुषं भजामि
पंचाक्षरं ब्रह्मविदो वदंति ॥ ७२ ॥

इति श्रीमदावस्थकगोविंदाशात्मज कविछविनाथविरचितं सर्वदेवमयमिदं श्रीकृष्णस्तोत्रं शोभते ॥

References.— Mss. Aufrecht's Catalogus Catalogorum, III, 27[a].

कृष्णस्तोत्र Krsnastotra

No. 844 $\frac{110\ (xviii).}{1895\text{-}98.}$

Size.— $5\frac{1}{4}$ in. by $8\frac{1}{8}$ in.

Extent.— 1 leaf; 13 lines to a page; 12 letters to a line.

Description.— For description see वल्लभाष्टक No. $\frac{110\ (i).}{1895\text{-}98.}$.

Age.— Fairly old.

Author.— Not mentioned.

Begins.— fol. 19[a]

श्रीकृष्णाय नमः
प्राकधर्मनाश्रयमप्राकृतानिखिलधर्मरूपमिति ॥
निगमप्रतिपाद्यं यत्तच्छुद्धं साकृति स्तौमि ॥ १ ॥

Ends.— fol. 19[b]

विनियोगो भक्तीयोग प्रतिबंधविनासने ॥
कृष्णाधरासृतास्वाद सिधिरत्र न संशयः ॥ ६ ॥

आनंद परमानंदः श्रिकृष्णस्य कृपानिधि ॥
दैवोद्धारै प्रयेत्नात्मा स्मृति—

कृष्णप्रेमामृत

Kṛṣṇapremāmṛta

No. 845

110 (xiii).
1895-98.

Size.— $5\frac{1}{4}$ in. by $8\frac{1}{8}$ in.

Extent.— 5^b to 7^a ; 13 lines to a page ; 12 letters to a line.

Description.— For description see वल्लभाष्टक No. 110 (i).
1895-98.

Age.— Fairly old.

Author.— Viṭṭhaleśvara.

Begins.— fol. 5^b

श्रीकृष्णाये नमः श्रीगोपिजनवलभाये नमः ॥
स्फुरत्कृष्णप्रेमाम्रतस्सभरेणाति भरिता
विहारात्कुर्वाणा व्रजपति विहाराब्धीषु सदा ॥
प्रीया गोभर्त्तुः स्फुरतु सततं वल्लभ इति
प्रथावत्यस्माकं हृदि सुभजमुर्त्तिः सकरुणा ॥ १ ॥ etc.

Ends.—fol. 7^a

मयि चेदस्ति विश्वासः श्रीगोपिजनवल्लभे ॥
तदा कृतार्थो यूयं हि शोचनियं न कर्हिचित् ॥ ८ ॥
इति श्रिविट्ठलेश्वरदीक्षीतविरचितं कृष्णप्रेमामृत संपुर्ण

References.— Mss. Aufrecht's Catalogus Catalogorum :—
I, 121^b ; II, 24^a ; III, 27^a.

कृष्णामृतमहार्णव Kṛṣṇāmṛtamahārṇava

No. 846 103. 1895-1902.

Size.—12¼ in. by 4¼ in.

Extent.— 10 leaves ; 9 lines to a page ; 44 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; incorrect ; hand-writing clear, legible and uniform ; folios without border-lines and to a certain extent, moth-eaten ; complete.

Age.— Śaka 1712 (= A. D. 1790).

Author.— Ānandatīrtha.

Begins.— fol. 1[a]

श्रीमध्वगुरुवे नमः ॥
अर्चितः संस्तुतो ध्यातः कीर्तितः कथितश्रुतः ॥
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥ १ ॥
तापत्रयेण संतप्तं यदेतदखिलं जगत् ॥
वक्ष्यामि शांतये ह्यस्य कृष्णामृतमहार्णवं ॥ २ ॥ etc.

Ends.— fol. 10[b]

कुर्वं नेवेह कर्माणि जिजीविषं छतं समाः ॥
एवं त्वयि नान्ययतोति न कर्म लिप्यते नरे ॥ २३ ॥
वेदा प्रणिहितो धर्मोह्यधर्मस्तद(द्वि)पर्ययात् ॥
निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते ॥ २४ ॥
निवृतं सेव्यमानस्तु ब्रह्माभ्येति सनातनं ॥ २२५ ॥
श्रीमदानंदतीर्थाख्य सहस्राकिरणोत्थिता-
गोततिसततं सेव्या गीर्वाणै शुद्धिदा भवेत् ॥ २२६ ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितः कृष्णामृतमाहार्णव संपूर्ण ॥

श्रीकृष्णार्पणमस्तु ॥ श्रीगुरुराजो विजयततरां ॥

— साधारणसंवच्छर फाल्गुण शुद्ध पंचमी गुरुवासरे शके १७१२ समाप्तः ॥ छ छ ॥

श्रीमज्जीवोत्तमाख्या यतिकुलसुदृढा विद्वलाराधकश्च
वेदेशास्त्रेष्वभिज्ञाः शुभगुणमहिताः सर्वविद्यासुदक्षाः ॥

विद्वद्वृंदैः सुधीराः श्रमपदसहितैः षड्भिरंगैर्विशिष्टः
सत्तर्कैर्जेतुशीलाः प्रविततसुगुणाः पांतु मां सुप्रसन्नः ॥ १ ॥
वंशस्यादौन् सनकादिनुपास्ये
दुर्वासाख्यं परतीर्थाख्य भिक्षुं ॥
सत्यप्रज्ञं प्राज्ञतीर्थं यतीं च
प्राक्तच्छिष्याख्यावच्युत प्रेक्षमध्यौ ॥ २ ॥

References.— Mss. Aufrecht's Cat. Catalo. I, 124[a].

कृष्णाश्रयस्तोत्रप्रकाश Kṛṣṇāśrayastotraprakāśa

No. 817 336. 1892–95.

Size.—$9\frac{5}{8}$ in. by $5\frac{1}{2}$ in.

Extent.— 37 leaves; 10 lines to a page; 26 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing bold, legible and uniform; borders ruled in double black lines; red pigment used; complete.

Age.— Appears to be fairly old.

Author.— Kalyāṇarāya.

Subject.— Commentary on the Kṛṣṇāśrayastotra.

Begins.— fol. 1[b]

। श्रीगोपीजनवल्लभाय नमः ॥

यल्लीलालवसंस्पर्शान्न रोचंते न्यदाशिषः ।
तं राधाहृदयानंदंदायकं कृष्णमाश्रये ॥ १ ॥
यत्कृपादृष्टितो जंतुर्गोविंदं विंदते सुदा ॥
भक्त्याहं तान्निजाचार्यानभिवंदे(र्थं?) सिद्धये ॥ २ ॥ etc.

Ends.— fol. 37[b]

श्रीमद्विट्ठलं नाथपादकमले संवंद्य भक्त्या सुदा
कृष्णैकाग्र्यधियोथ तातचरणांन् तद्रक्षितृव्यानपि ॥

श्रीकृष्णाश्रयसंज्ञके स्तुतिवरे कल्याणरायाभिधः
श्रीगोविंदसुतः प्रकाशमकरोद्भूयान्मुदे सद्धिया ॥

इति श्रीवीट्ठलनाथचरणकमलैकतानकल्याणरायविरचित श्रीकृष्णाश्रयस्तोत्रप्रकाशः समाप्तः ॥ श्रीकृष्णसत्य ॥ छ ॥

References.— Mss. Aufrecht's Catal. Catalogorum III, 27[b].

कृष्णाश्रयस्तोत्रविवरण Kṛṣṇāśrayastotravivaraṇa

No. 848 270. / 1891-95.

Size.—$10\frac{1}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 13 leaves; 11 lines to a page; 45 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear legible and uniform; red pigment occasionally used; complete

Age.— Appears to be fairly old.

Author.— Vrajarāja.

Subject.— Commentary on the Kṛṣṇāśrayastotra of Vallabha.

Begins.— fol. 1[b]

कृष्णाय नमः ॥

यद्वाक्यमात्रकथनात्स्वीयत्वं मनुते हरिः ।
सकृष्णवल्लभाचार्य पादरेणुर्विराजते ॥ १ ॥
तदनुग्रहतः कृष्णाश्रयस्य विवृतिर्मया ।
विधीयते यतः कृष्णाश्रयः फलति सर्वथा ॥ २ ॥ etc.

Ends.— fol. 13[b]

कृष्णाश्रयं स्तोत्रं श्रीरूपः स्वामिनीभावपूरितत्वात् वल्लभः भगतः प्रियः आचार्यवर्योऽब्रवीदिति यः पठेत् एवमनुसंदधानो योस्मद्विप्रयोगावस्थां ज्ञापयन् कृष्णसन्निधौ व्यक्तं कथयेत् तस्य कृष्ण आश्रयो भवेदिदं विज्ञापनमित्यर्थः । स्तोत्रस्य प्रत्यक्षत्वेनेदमाविनाप्यर्थसिद्धेरिति शब्दांतरानाध्या-

हाराच्चात्र दूरांन्वयोप्यदुष्ट एव । विमुंच्यात्म तनुं घोरामित्युक्तो विससर्ज ह विससर्ज तनुं ता वै ज्योत्स्नां कांतिमतीं प्रियामित्यादौ भाव एव तनुत्वेन व्यवहाराच्च श्रीरूपत्वोक्तावपि न दोष इति न कोपि शंका लेश इति यथाधिकारं सर्वा एव टीका उपयुज्यंत इति न कापि शंकालेश इति दिक् ॥११॥

इति श्रीवल्लभाचार्यप्रकटीकृतमद्भुतं स्तोत्रं कृष्णाकरं विवृतं तत्प्रसादतः ॥ १ ॥

इति श्रीमद्वल्लभाचार्यचरणकमलचंचरीक श्रीश्यामलात्मजश्रीव्रजराजविरचितं श्रीकृष्णाश्रयस्तोत्रविवरणं समाप्तं ॥ ॥ श्रीकृष्णाय नमः ॥ छ ॥

श्री ॥

References.— Mss. Aufrecht's Cat. Cata. III, 27[b].

कृष्णाष्टक Kṛṣṇāṣṭaka

No. 849 262. 1892-95.

Size.— 9½ in. by 4¼ in.

Extent.— 4 leaves ; 6 lines to a page ; 20 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing careless but legible and clear ; no border-lines on the folios.

Age.— Does not appear to be very old.

Author.— Śaṅkarācārya.

Begins.— fol. 1[a]

श्रीगणेशाय नमः ॥

केशवं मधुसूदनं करुणार्णवं गरुडध्वजं
जा(यां)दवं ज(य)दुनायकं मुरमर्दनं जगदीश्वरं अच्युतं
हरिवामनं श्रीमुकुंदविष्णुचतुर्भुजं श्रीनिवास-
जनार्दनं प्रणमामि etc.

Ends.—fol. 4[a]

ध्यानयोगजपादिकर्म करोति नित्यमतिक्रमं निर्गुणंशगुणाधिकं यःस्मृति

चित्तसदावृत्तं कृष्णाष्टकप्रातिरेवपठितविप्रपवित्रकं धर्मार्थसमनानिजमोक्ष प्राप्त न संशयं कृष्ण कृष्ण नमो नमो जय रामकृष्ण नमो नमो बालकृष्ण नमो नमो गोपालकृष्ण नमो नमः ॥ ८ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमत्सं(शं)कराचार्यविरचितं कृष्णाष्टकं संपूर्णम् ॥ शुभमस्तु ॥ श्री

References.— Mss. Aufrecht's Cat. Cata. I, 124[a] ; II, 24[b] ; III, 27[b].
Printed in Bṛhatstotraratnākara, p. 127.

गणपतिसहस्रनामस्तोत्र — Gaṇapatisahasranāmastotra

No. 850 — 390. / Viś (i).

Size.— $7\frac{7}{8}$ in. by $4\frac{7}{8}$ in.

Extent.— 13 leaves ; 9-10 lines to a page ; 20 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear and legible but not uniform ; the Ms bears seals on 1st and the last folios.

Age.— Appears to be old.

Begins.— fol. 1[a]

श्रीमहागणपतिरुवाच ॥
॥ ॐ गणेशो गणक्रीडो गणनाथो गणाधिपः ।
एकदंतो वक्रतुंडो गजवक्त्रो महोदरः ॥ १ ॥ etc.

Ends.— fol. 13[a]

शिवोद्यवायष्टकाटि विनायक धुरंधरः ॥
त्रयस्त्रिंशत्कोटिसुरश्रेणिप्रणजपादुकः ॥ ६८ ॥
अनंतदेवतार्षीणामनंतशुभदायकः ॥
अनंतनामानंतश्रीरनंतसुखदायकः ॥ १६९ ॥
एवं श्लोकाः ॥ १७३ ॥
इति वैनायकं नाम्नां सहस्रमिदमीरितं ॥

References.— Mss. Aufrecht's Catalogus Catalogorum :— I, 142[a].

महागणपतिस्तोत्र Mahāgaṇapatistotra

No. 851 126. 1891–95.

Size.— 5¾ in. by 3¾ in.

Extent.— 2 leaves; 9 lines to a page; 15 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; paper very much discoloured; hand-writing clear, legible and uniform; borders ruled in two double red lines; complete.

Age.— A modern copy.

Author.— Īśvara (?).

Begins.— fol. 1ᵇ

॥ श्रीगणेशाय नमः ॥

गंडस्थळांतरगळं मदवारिधारं
गंडद्भमद्भमरवारिणि कर्णतालं ॥
गंधर्वयक्षसुरकिन्नरगीयमानं
गंगाधरस्य तनयं शरणं प्रपद्ये ॥ १ ॥ etc.

Ends.— fol. 2ᵇ

इदं स्तोत्रं गणपतिं षण्मासेन फलं लभेत् ।
अष्टौ ब्राह्मणान् भोजयित्वा ततो विद्यां फलश्रुति ॥
संदेहो नात्र कर्तव्यो नान्यथा शिवभाषितं ॥

इति श्रीईश्वरप्रोक्तं महागणपतिस्तोत्रं संपूर्ण ॥ छ ॥ छ ॥

References.— Mss. Aufrecht's Cat. Catalo. III, 30ᵇ.
This Ms. is recorded by Aufrecht.

गणेशभुजंगस्तोत्र — Gaṇeśabhujangastotra

No. 852 — 319 (viii). 1879-80.

Size.—$8\frac{5}{8}$ in. by $4\frac{3}{8}$ in.

Extent.—fol. 1[a] to 1[b] ; 9 lines to a page ; 24 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear and legible ; text bounded with decorated lines ; complete.

Age.— Fairly old.

Author.— Śaṅkarācārya.

Begins.—fol. 1[a]

ॐ श्रीगणेशाय नमः ॥

ॐ उमागंगजं कर्णवक्त्रं गणेशं
भुजाकंकणं शोभितं धूम्रकेतुं ।
गलेहार मुक्ताफला शोभिवंतं
नमो ज्ञानरूपं गणेशं नमामि ॥ १ ॥ etc.

Ends.— fol. 1[b]

भुजंगं प्रयातं पठेयस्तु भक्त्या
प्रभातं सुबुद्धया एकाग्रचित्तः ॥
क्षयं यांति विघ्नाः दिशः शोभयंतं
नमो ज्ञानरूपं गणेशं नमामि ॥ ८ ॥

इति श्रीशंकराचार्यविरचितं गणेशभुजंगस्तोत्रं संपूर्णं ॥ शुभमस्तु ॥

References.— Mss. Aufrecht's Cat. Catalo. I, 144[b] ; II, 29[a].

Descriptive Catalogues :—

I. O. Cat. Vol. II, pt. II, No. 8137.

गणेशस्तोत्र Gaṇeśastotra

No. 853 579 (ii). Viśrāma (i).

Size.— $5\frac{5}{8}$ in. by $3\frac{1}{2}$ in.

Extent.—fol. 3[a] to 4[a] ; 11 lines to a page ; 32 letters to a line.

Description.— For description see No. $\frac{579(i)}{Vis.\ (i)}$ प्रार्थनास्तोत्र below.

Age.— Appears to be a modern copy.

Author.— Not mentioned.

Begins.—fol. 3[a]

श्रीगणेशाय नमः ॥

व्यास उवाच

पंचास्यश्चतुरास्यश्च सहस्रमस्तकोपि च
गजास्यं वरदं देवं कथमेते प्रतुष्टुवुः १

ब्रह्मोवाच

प्रसादोन्मुखविघ्नेश कृपापांगनिरीक्षणात्
प्राप्तबुद्धिप्रसादास्ते केशास्ते तुष्टुवुस्तदा २

Ends.— fol. 4[a]

एवं स्तुतो गणेशस्तु संतुष्टोभून्महामुने
कृपया परयोपेतोभिधातुं तान्प्रचक्रमे १५

गणेश उवाच

यदर्थं क्लेशिता यूयं यदर्थमिह चागताः
प्रीतोह मनया स्तुत्या वरं मत्तो वृणीततं १६
कृतं च मम यत्स्तोत्रं भवद्भिर्भावितात्मभिः
स्तोत्रराजमिति ख्यातं भविष्यति ममाज्ञया १७
इदं यः पठेत्प्रातरुत्थाय धीमान्
त्रिसंध्यं सदा भक्तियुक्तो विशुद्धः ।
स पुत्रान् श्रियं सर्वकामान् लभेत
परब्रह्मरूपो भवेदंतकाले ॥ १८
इति तद्वचनं श्रुत्वा संतुष्टास्ते तमब्रुवन् ॥
तदिच्छया रजः सत्त्वतमोगुणसमुद्भवाः १९

इति गणेशस्तोत्रं संपूर्णं ॥ छ छ ॥ ॥

References.— Mss. Aufrecht's Catalogus Catalogorum I, 145[a]; II, 29[a]; III, 31[a].

गणेशाष्टक

Gaṇeśāṣṭaka

No. 854

478.
1895-98.

Size.— $4\frac{1}{8}$ in. by 3 in.

Extent.— 6 leaves; 4 lines to a page; 10 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing clear, legible and uniform; text bounded on all sides with borders in two double red lines; edges also ruled in single red lines; complete.

Age.— Does not appear to be very old.

Author.— Śaṁkarācārya.

Begins.—fol. 1[b]

॥ श्रीगणेशाय नमः ॥
ॐ उमागंगजं कर्णवक्त्रं गणेशं
भुजाकंकणं शोभितं धूम्रकेतुम् ॥
गले हारमुक्ताफलाशोभिवंतं
नमो ज्ञानरूपं गणेशं नमस्ते ॥ १ ॥etc.

Ends.— fol. 6[a]

भुजंगं प्रयाते पठे यस्तु भक्त्या
प्रभाते पठे शुद्धि चैकाग्रचित्तं ॥
क्षयं यांति विघ्नं दिशो शौभवंतं
नमो ज्ञानरूपं गणेशं नमस्ते ॥ ८ ॥
इति श्रीशंकराचार्यविरचितं गणेशऽष्टक संपूर्णम् ॥१॥

References.— Mss. Aufrecht's Cat. Catalo. I, 145[a]; III, 31[a].

गायत्रीपंजरस्तोत्र Gāyatrīpañjarastotra

No. 855 384 (v). 1882-83.

Size.—$7\frac{3}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 20 leaves ; 5 lines to a page ; 18 letters to a line.

Description.— See गायत्रीसहस्रनाम No. 857.

Author.— Not mentioned.

Subject.— Stotra from the Brahmatāntrika.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥

ॐ अस्य श्रीगायत्रीपंजरस्य ब्रह्माऋषिः विक्रतीछंदः परमहंसो देवता ॐबीजं तत्सावितुशक्तिः प्रचोदयात्कीलकं गायत्रीपंजरजपे विनियोगः ॐमूलेन षडंगन्यासः ॥ ॐ ब्रह्मविष्णुमहेश्वरा ऋषिभ्यो नमः शिरसि ॥ etc.

Ends.— fol. 20[a]

श्रीकामो विष्णुगेहे च मुमुक्षु यत्र कुत्रचित् ॥
जपारंभे तु हृदयं जपांते पंजरं पठेत ॥ ९७ ॥
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितां ॥ ९८

इति श्रीब्रह्मतांत्रिके ब्रह्मनारदसंवादे गायत्रीपंजरस्तोत्रं शुभं भवतु ॥ ॥ श्री ॥

References.— Mss. Aufrecht's Catalogus Catalogorum, I, 152[a].

गायत्रीभुजङ्गस्तोत्र Gāyatrībhujaṅgastotra

No. 856 130. 1891-95.

Size.— $8\frac{7}{8}$ in. by $4\frac{1}{4}$ in.

Extent.— 1 leaf ; 9 lines to a page ; 28 letters to a line.

Description.— Country paper ; Devanāgarī characters ; right-hand corner of the folio damaged ; hand-writing bold, legible and uniform ; the folio is pasted with two paper-slips.

Age.— Śaka 1705 (= A. D. 1783).

Author.— Not mentioned.

Subject.— Stotra from the Brahmatāntrika.

Begins.—fol. 1[a]

ॐ श्रीगणेशाय नमः ॥

उषःकालगम्यामृदातत्स्वरूपा-
मकार ... ...
अजेशादिवंद्यामजाद्यंगभाजा-
मनौगम्यरूपां भजाम्यादि संध्यां १
सदाहं स या ... रद्रक्तवस्त्रां
वराभीति हस्तां रुगाम्नायरूपां
स्फुरत्स्वाधिकामक्षमालां च कुंभां
दधानामहं भावये पूर्वसंध्यां २ etc.

Ends.— fol. 1[b]

सदा तत्पदैस्तूयमानां सवित्रीं
वरेण्यं महाभर्गरूपां त्रिनेत्रां
सदा देवदेवस्य पत्नीमुपांता-।
मिति स्तोतु वांछाफलं मे ब्रवाणा ११
इतीदं भुजंगं पठे विष्णुभक्त्या
... धायचित्ते सदा श्रीभवानी
त्रिसंध्या स्वरूपां त्रिलोक्यैकवंद्यां
स मुक्तो भवेत्सर्वपापै ... ...

इति ब्रह्मतांत्रिके गायत्रीभुजंगं समाप्तः

श्रीकछा सके १७०५ शोभनकृत सं... ...
स्वपाठार्थं लिखिते

References.— Mss. Aufrecht's Catalogus Catalogorum :—
I, 152[a] ; III, 33[a].

Descriptive Catalogues :—
Govt. Ori. Mss. Cat. Madras, Vol. XVIII, Nos. 9414-9418.

गायत्रीसहस्रनाम — Gāyatrīsahasranāma

No. 857 — 384 (i). 1882-83.

Size.— $7\frac{3}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 30 leaves ; 5 lines to a page ; 18 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled with double red lines ; complete. The bundle contains seven stotras each having a different pagination. These stotras are :—

(1) गायत्रीसहस्रनाम	foll.	1 - 30
(2) गायत्रीस्तवराज	,,	2 - 24
(3) गायत्रीकवच	,,	1 - 6
(4) गायत्रीहृदय	,,	1 - 22
(5) गायत्रीपञ्जरस्तोत्र	,,	1 - 20
(6) गायत्रीवर्णस्तोत्र	,,	1 - 11
(7) गायत्रीस्तोत्र	,,	1 - 7

Age.— Saṁvat 1838 (= A. D. 1782).

Author.—Not mentioned.

Subject.— Stotra from Viṣṇuyāmala.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥

नारदोवाच—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ॥
श्रुतिस्मृतिपुराणानां रहस्यं तत्त्वमुच्छितं ॥ १ ॥
सर्वपापप्रहरणं केनाविद्या निवर्त्तते ॥
केन वा ब्रह्मविज्ञानं केन वा मोक्षसाधनं ॥ २ ॥ etc.

Ends.— fol. 29[b]

इदं रहस्यममलं मयोक्तं ऋषिसत्तमः ॥
पठनाद् ब्रह्मसायुज्यं प्राप्नुवंति न संशयः ॥ १४९ ॥

इति श्रीविष्णुयामले सृष्टिप्रशंसायां गायत्र्याष्टोत्तरसहस्र नाम शुभं भवतु ॥ ॥ कल्याणमस्तु ॥ ॐ नमः ॥ ॥ प्रीत्यर्थं ॐ नमो भगवत्यै

गायत्र्यै सवितादेवतायै नमः ॥ ॥ प्रीयतां ॥ ॥ शुभं भवतु ॥ ॥ संवत् १८३८ नामाघ शुदि त्रयोदसी भानुवासरेण लिखितंमिदं पुस्तकं ॥ छ ॥

References.— Mss. Aufrecht's Catalogus Catalogorum :—
I, 152[b] ; II, 30[b] ; III, 33[a].

गायत्रीसहस्रनामस्तोत्र — Gāyatrīsahasranāmastotra

No. 858 — 609. / 1899-1915.

Size.— $9\frac{3}{4}$ in. by $4\frac{5}{8}$ in.

Extent.— 10 leaves ; 10 lines to a page ; 26-28 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing bold, clear and legible but not uniform ; borders ruled with double red lines ; complete.

Age.— Appears to be fairly old.

Author.— Not mentioned.

Begins.— fol. 1[b]

श्रीमोरेश्वराय नमः ॥ श्रीगायत्र्यै नमः ॥

श्रीनारद उवाच ॥
भगवत्सर्वलोकेश सर्वशास्त्रार्थपारग ॥
श्रुतिस्मृतिपुराणानां रहस्यं त्वन्मुखाच्युतं ॥ १ ॥
सर्वपापहरं देव केन विद्या निवर्तते ।
केन वा ब्रह्मविज्ञानं केन वा मोक्षसाधनं ॥ २ ॥
ब्रह्मणानां गतिः केन केन वा मृत्युनाशनं ॥
ऐहिकामुष्मिकफलं केन वा पद्मसंभव ॥ ३ ॥
वक्तुमर्हस्यशेषेण सर्वं निखिलमादितः ॥ etc.

Ends.— fol. 10[b]

सुभक्ताय सुशिष्याय वक्तव्यं सुसुराय वै ॥
इदं रहस्यं परमं गुह्याद्गुह्यतरं महत् ॥ ५६ ॥
पुत्रप्रदमपुत्राणां दरिद्राणां धनप्रदं ॥
मोक्षप्रदं मुमुक्षुणां कामिनां सर्वकामदं ॥ ५७ ॥

रोगार्तो(र्तो) मुच्यते रोगाद्बंधो मुच्येत बंधनात् ॥
ब्रम्हहत्या सुरापान सुवर्णस्तेयिनो नराः ॥ ५८ ॥
गुरुतल्पगतो वापि पठनान्मुच्यते सकृत् ॥
इदं रहस्यं परमं मयोक्तं ऋषिसत्तमा ॥ ५९ ॥
श्रावणाद्ब्रम्हसायुज्यं प्रा(प्नु)वंति न संशयः ॥
सर्वपापाविनिर्मुक्तः सर्वलोकं स गच्छति ॥ १६० ॥

इति श्रीमद्विष्णुयामले सृष्टिप्रशंसायां ब्रम्हविष्णुसंवादे नारदं प्रति ब्रम्होक्तं गायत्रीसहस्रनामं संपूर्ण ॥ शुभं भवतु ॥

References.— See No. 857.

गायत्रीस्तवराज

Gāyatrīstavarāja

No. 859

384 (ii).
1882-83.

Size.— $7\frac{3}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 23 leaves ; 5 lines to a page ; 18 letters to a line.

Description.— For description see गायत्रीसहस्रनाम No. 857.

Age.— Saṁvat 1839 (= A. D. 1783).

Author.— Viśvāmitra.

Subject.— Stotra from the Brahmatāntrika.

Begins.—abruptly fol. 2[b]

यज्यादि नानाविधानि छंदांसि नमो मुखे ॥ सकलजननी चतुष्पदा गायत्री परमात्मा देवतायै नमो हृदये ॥

Ends.— fol. 23[a]

पदपादाक्षराद्बीजं षटकक्षिभिः समंत्रकं ॥
द्वादशैर्लक्षणैयुक्तां गायत्री सफला भवेत् ॥
करांगशोधनं शुद्धिर्वर्णन्यासविधानतः ॥
छंदः षोडशयो वेत्ति सोपि ब्रह्माग्निविग्रहः ॥ ६९ ॥
शक्तिगंधाष्टकं प्राज्ञो लेखिनी मंडलक्रिया ॥
द्रव्याधारं पात्रशुद्धिं ज्ञात्वा भेदं प्रमुच्यते ॥ ७० ॥

इति श्रीब्रह्मतांत्रिके विश्वामित्रकृते गायत्रीस्तवराजः शुभं भवतु कल्याणमस्तु ॥ ७ ॥ ॥

माहापर्वणि यन्मया अमुकगोत्रोत्पन्नेन अमुकशर्मणाः गायत्री ॥ स्तवराज पाठकृतं तत् ॥

मम अभीष्टसिध्यर्थं गायत्रीदेवताप्रीत्यर्थं ॐ नमो भगवत्यै गायत्र्यै सवितादेवतायै नमः ॥ श्रीरस्तु ॥

संवत् १८३९ ना वर्षे कार्त्तिकमासे शुक्लपक्षे तिथौ पंचमी मंदिवासरेण लिखितमिदं पुस्तकं ॥

लेखक विप्रज्ञाती सोरठीसारस्वत पंड्यानाहानासुतकेशवजीयेन लिपीकृतं ॥

References.— See No. 857.

गायत्रीस्तवराज

Gāyatrīstavarāja

No. 860

98.
1884-87.

Size.— $5\frac{1}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 30 leaves ; 8 lines to a page ; 20 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; folios without borders ; complete.

Age.— Appears to be pretty old.

Author.— Not mentioned.

Begins.— fol. 1^b

॥ श्रीगणेशाय नमः ॥

अथ स्तवराजो लिख्यते ॥

स्तवराज प्रवक्ष्यामि सर्वमंत्रफलप्रदं
मंत्रोद्धार तथा यंत्रं साधनं परमोत्तमं १
आसीनो वाज्ञ(?)पालो वा गच्छंस्तिष्ठंस्तथैव च
मंत्रराजं जपेद्भक्त्या प्रत्यवायो न विद्यते २

ॐ अस्य श्रीगायत्रीस्तवराजस्तोत्रमहामंत्रस्य नूतनसृष्टिकर्ता विश्वामित्र ऋषिः etc.

Ends.— fol. 29^{b}

ज्ञानाद्वरेण्यं श्रेष्ठं च फलमज्ञानसिद्धतः ॥
सवितुस्तु निजं रूपं सच्चिदानंदसागरं ॥ ८ ॥
श्रीःमच्यवतीस्तनयः संख्ये यां सन्मुखी शुभां ॥
अभिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह ॥ ९ ॥
सोहमस्मीत्युपासीत विधिना येन केनचित् ॥
तं विधिं सर्वदा सेवेयोगी परमतत्त्ववित् ॥ १० ॥

इति गायत्र्याख्यानं समाप्तम् ॥ शुभमस्तु ॥ श्रीरस्तु कल्याणम ॥

References.— See No. 857.

गायत्रीस्तोत्र Gāyatrīstotra

No. 861 384 (vii). 1882–83.

Size.— $7\frac{3}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 7 leaves ; 5 lines to a page ; 20-22 letters to a line.

Description.—Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled with double red lines ; complete.

Age.— Saṁvat 1838 (A. D. 1782).

Subject.— Stotra from the Rudrayāmala.

Begins.— fol. 1^{b}

॥ श्रीगणेशाय नमः ॥

ॐ भैरव उवाच ।

शृणु देवी प्रवक्ष्यामि गायत्रीतत्त्वमुत्तमं ॥
स्तोत्रे मंत्रमयं सर्वं सर्वतंत्रेषु गोपितं ॥ १ ॥

अंगं पंचकमिशानी महापातकनाशनं ॥
पुण्यप्रदं वेदसारं सर्वतत्वोत्तमोत्तमं ॥ २ ॥ etc.

Ends.— fol. 7[b]

इतिदं देवी गायत्रीस्तस्य मम रहस्यके ।
गुह्यगोपां महातत्त्व गोपनीय मुमुक्षिभि ॥ २१ ॥

इति श्रीरुद्रयामले गायत्रीरहस्ये गौरीशंकरसंवादे गायत्री स्तोत्रं शुभं भवतु ॥ छ ॥ सवत् १८३८ ना वर्षे पोसमासे कृष्णपक्षे तिथी चतुर्दसी मंदिवासरेण लिखितमिदं पुस्तकं ॥ लेखकपाठकयो शुभं भवतु ॥ ॥ श्री ॥ छ ॥

References.— Mss. Aufrecht's Cat. Catalo. I, 152[b]; 30.[b]
Descriptive Catalogues :— I. O. Cat. Vol. II, Pt. II, No. 7076. But this is not the same as the present work though both have the same title.

गायत्रीवर्णस्तोत्र — Gāyatrīvarṇastotra

No. 862 — 384 (vi). 1882-83.

Size.— $7\frac{3}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 11 leaves ; 5 lines to a page ; 18 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled with double red lines ; complete.

Age.— Samvat 1838 (= A. D. 1782).

Author.— Not mentioned.

Subject.— Gāyatrīstotra from the Brahmayāmala.

Begins.—fol. 1[b]

॥ श्रीगणेशाय नमः ॥
वर्णस्तोत्रं प्रवक्ष्यामि सर्वसिद्धि फलप्रदं ॥
ऋषिछंदो देवता च पूर्ववत चिंतयेत बुधैः ॥ १ ॥
दशप्रणवगायत्री विप्राणां वेदवादिषु ॥
जीवनं भजनक्षेमं मंत्रराजमिति स्मृतं ॥ २ ॥

प्रणवं पूर्वमुच्चार्य भूरादिश्च तथैव च ॥
तुर्ये सहैव गायत्री जप एवमुदाहृतं ॥ ३ ॥ etc.

Ends.— fol. 11b

सम्यक् ध्यायेत सा संध्या संध्या संध्यः स्वरूपिणी ॥
दिवा रात्रौ सदा पातु पातु मां ब्रह्मदेवता ॥ ६७ ॥
इति श्रीब्रह्मयामले गायत्रीवर्णस्तोत्रं शुभं भवतु ॥ ७ ॥ संवत् १८३८ ना वर्षे माघ मासे शुक्लपक्षे तिथि चतुर्थी गुरुवासरेण लिखितमिदं पुस्तकं ॥

गायत्रीहृदय

Gāyatrīhṛdaya

No. 863

269.
A. 1881-82.

Size.— 10$\frac{1}{8}$ in. by 4$\frac{5}{8}$ in.

Extent.— 11 leaves ; 8 lines to a page ; 30 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear, beautiful and uniform ; complete.

Age.— Saṁvat 1824.

Author.— Not mentioned.

Begins.— fol. 1b

श्रीगणेशाय नमः ॥ नमस्कृत्य भगवान् याज्ञवल्क्यः स्वायं भुवंपरिपृच्छति ॥ त्वन्नो ब्रूहि ब्रह्मन् गायत्र्युत्पत्तिं तूयं श्रोतुमिच्छामि ॥ ब्रह्मज्ञानोत्पत्तिं परिपृच्छामि ॥ etc.

Ends.— fol. 11b

अमुक शर्मणः ॥ गायत्रीहृदय पाठकृतं तत् मम अभीष्टसिध्यर्थं गायत्री देवता प्रीत्यर्थं ॥ ॐ ॥ नमो भगवत्यै गायत्र्यै सविता देवतायै नमः ॥ प्रीयंतां शुभं भवतु ॥ संवत् १८२४ ॥ श्रावण वदी नवमी सोमवासरे लिखितं गजानि जेठा देवरामेण पठनार्थं ॥

References.— Mss. Aufrecht's Cat. Catalo. I, 152b ; II, 30b ; III, 33a.

Descriptive Catalogues :— I. O. Mss. Cat. Vol. II, pt. I, No. 6120.

गायत्रीहृदय

Gāyatrihṛdaya

No. 864

384 (iv).
1882-83.

Size.— $7\frac{3}{8}$ in. by $3\frac{7}{8}$ in.

Extent.— 22 leaves ; 5 lines to a page ; 20 letters to a line.

Description.— See गायत्रीसहस्रनाम No. 857.

Age.— Samvat 1838 (= A. D. 1782).

Author.— Not mentioned.

Begins.—fol. 1[b]

॥ श्रीगणेशाय नमः ॥ हरिः ॐ म् ॥

नमस्कृत्य भगवान् याज्ञवल्क्यः स्वायंभुवं परिपृच्छति ॥
त्वन्नो ब्रूहि ब्रह्मन् गायत्र्युत्पत्तिं तुरीयं श्रोतुमिच्छामि ॥
ब्रह्मज्ञानोत्पत्तिं परिपृच्छामि etc.

Ends.—21[b]

षष्टिशतसहस्रगायत्र्या जप्त्वा निष्फलानि भवंति ॥
अष्टौ ब्रह्मणान् सम्यग्राहयेत् ॥ तस्य सिद्धिर्भवति ॥
इदं नित्यमधीयानो ब्राह्मणः प्रयतः शुचिः ॥
सर्व पापैः प्रमुच्यते ॥ ब्रह्मलोके महीयते ॥
ब्रह्मलोके महीयत इति ॥ इत्याह भगवान् याज्ञवल्क्यः ॥

इति गायत्रि हृदय समाप्ताः ॥ छ ॥

ॐ अथ नमः ॥ परमात्म० महा पर्वणि यन्मया अमुक गोत्रोत्पन्नेन अमुक शर्मणाः ॥ गायत्री हृदय पाठ कृतं तत् मम अभीष्ट सिध्यर्थे गायत्री देवता प्रीत्यर्थं ॐ नमो भगवत्यै गायत्र्यै सवितादेवतायै नमः प्रीयतां ॥ छ ॥ संवत् १८३८ ना वर्षे माहा सुदि चतुर्थी गुरुवासरेण लिखितमिदं पुस्तकं ॥ ॥ श्री ॥

गायत्रीहृदय समाप्तः ॥

गायत्र्यष्टसहस्रनामस्तोत्र Gāyatryaṣṭasahasranāmastotra

No. 865 654.
1895–1902.

Size.— $6\frac{1}{2}$ in. by $3\frac{3}{4}$ in.

Extent.— 13 leaves; 9 lines to a page; 28 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing small but beautiful, legible and uniform; corners slightly moth-eaten; borders ruled with double red lines; complete.

Age.— Does not appear to be very old.

Author.— Not mentioned.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥

॥ नारद उवाच ॥

भगवन्सर्वलोकेश etc. as in No. 858

Ends.—fol. 13[a]

इदं रहस्यं परमं etc. up to प्राप्नुवंति न संशयः ॥ ५६ ॥
as in No. 858

followed by इति श्रीविष्णुयामले सृष्टिप्रशंसायां ब्रह्मानारद संवादे गायत्र्याष्टसहस्रनाम स्तोत्र संपूर्णम् ॥

गायत्र्यष्टोत्तरसहस्रनाम Gāyatryaṣṭottarasahasranāma

No. 866 131.
1891–95.

Size.— $8\frac{3}{4}$ in. by $4\frac{1}{4}$ in.

Extent.— 10 leaves; 9 lines to a page; 32 letters to a line.

Description.— Country paper; Devanāgarī characters; old and considerably moth-eaten; hand-writing clear, legible, uniform and fairly correct; many of the folios pasted with paper-slips; complete.

Age.— Śaka 1705 (= A. D. 1783).

Author.— Not mentioned.

Begins.— fol. 1[a]

श्रीगणेशाय नमः नारदोवाच ॥

भगवन् सर्वलोकेश etc. as in No. 858

Ends.— fol. 10[a]

इदं रहस्यं परमं etc. up to प्राप्नुवंति न संशयः ५९ छ
as in No. 858

followed by इति विष्णुसंवादे नारदप्रशंसायां **गायत्र्याष्टसहस्रनाम** पंचातमो ध्यायः श्रीकृष्णार्पणमस्तु हस्ताक्षर विसाजी सोनदेव कुळकर्णी मौजे सेडि पोखर्डि तस्य सुत पुरुषोत्तमेन लिखितं नित्य पाठार्थं शुभं भवतु श्रीराम श्रीसांब शके १७०५ शोभनकृत नाम संवच्छरे श्रावण शुद्ध १२ द्वादशी मंदवासर संपूर्ण

References. — Mss. Aufrecht's Catalogus Catalogorum I, 153[a]; III, 33[a].

गिरिधार्याष्टक

No. 867

Giridhāryāṣṭaka
174 (iv).
1892-95

Size.— $11\frac{1}{4}$ in. by $5\frac{1}{2}$ in.

Extent.— fol. 10[b]; 13 lines to a page; 44 letters to a line.

Description.— For description see चौर्यचर्या No. $\frac{174\ (i).}{1892\text{-}95.}$

Age.— Fairly old.

Author.— Raghunātha.

Begins.— fol. 10[b]

अथ गिरिधार्याष्टकं ॥

त्रैलोक्यलक्ष्मी मदभृत्सुरेश्वरो
यदग्घनैरंतकरैर्ववर्ष ह ।
तदाकरोद्यः स्वबलेन रक्षणं
तं गोपबालं गिरिधारिणं भजे ॥ १ ॥ etc.

Ends.— fol. 10[b]

प्रणम्य संप्रार्थयते तवायत-
स्त्वदंहिरेणुं रघुनाथनामकः ।
श्रीविट्ठलानुग्रहलब्धमन्मति-
स्तप्तूरकैस्तस्य मनोरथार्णवं ॥ १० ॥
इति श्रीरघुनाथकृतौ गिरिधार्याष्टकं समाप्तं ।

References.— Mss. Aufrecht's Cat. Catalo. III, 33[a].

Descriptive Catalogues :— Govt. Ori. Mss. Cat. Madras, Vol. XVIII, p. 6968, No. 9954.

गीतासारस्तोत्र — Gītāsārastotra

No. 868 — 132. 1891-95.

Size.— $6\frac{3}{8}$ in. by $6\frac{3}{8}$ in.

Extent.— 4 leaves ; 16 lines to a page ; 22 letters to a line.

Description.— Country paper ; Devanāgari characters ; hand-writing small and not quite clear and legible ; some folios mended with paper-slips ; the Ms originally appears to have been in a book-form ; complete.

Age.— Saṁvat 1907 or Śaka 1772 (= A. D. 1850).

Author. — Not mentioned.

Begins.—fol. 1[a]

॥ श्रीकृष्णाय नमः

ॐ अस्य श्रीगीतासारस्तोत्रमंत्रस्य ॐकारस्य ब्रह्माविष्णुमहेश्वरा ऋषय· गायत्रीत्रिष्टुप् छंदांसि...वायु सूर्योदेवता ऋग्यजुसामतत्वं आहवनीयगार्हपत्य दक्षिणानि स्थानानि भुर्भुवः etc.

Ends.— fol 4[b]

जपतां श्रृण्वतां चैव गीतासारमनुत्तमं
यः पठेत्प्रातरुत्थाय गंगास्नानं दिने दिने

इति श्रीकृष्णार्जुनसंवादे गीतासारस्तोत्रं संपूर्णम् संवत् १९०८ शाके १७८२ द्वि० वैशाख शुक्ल १ रविवारे.

References.— Mss. Aufrecht's Cat. Catalo. III, 33[a].

गुरुगीतास्तोत्र — Gurugītāstotra

No. 869 — 462. 1883-84.

Size.— $8\frac{3}{8}$ in. by 4 in.

Extent.— 23 leaves; 6 lines to a page; 20 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing bold, clear, legible and uniform; borders carelessly ruled in triple lines, one in black and two in red; ink spread on folios; red ink also frequently used; complete.

Age.— Fairly old.

Author.— Vyāsa.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥
कैलासशिखरे रम्य भक्तिसाधन नायकं ॥
प्रणम्य पार्वति भक्त्या शंकरं परिपृच्छति ॥ १ ॥
पार्वत्युवाच ॥
ॐ नमो देव देवेश परात्परं जगद्गुरुः ॥
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ॥ २ ॥
केन मार्गेण भो स्वामि देहि ब्रह्ममयो भवेत् ॥
तत्कृपाकुरुते स्वामि नमामि चरणं तव ॥ ३ ॥ etc.

Ends. fol. 22[b]

अतिव चित्तस्यांतस्य श्रद्धा भक्तिसमन्वित· ॥
वक्तव्यं तु इदं देवी ममात्मासि सदा प्रिय ॥
अभक्ते वंचके धूर्त्ते पाषाडे नास्तिके नरे ॥
मनसापि न वक्तव्यं गुरुगीता कदाचनः ॥ १४० ॥
इति श्रीपद्मपुराणे उत्तर खंडे उमामहेस्वर शंवादे गुरुगीता संपूर्ण शुभमस्तु ॥

References.— Mss. Aufrecht's Cat. Catalo. I, 156[a]; II, 31[b]; III, 33[b].

Des. Catalogues :— I. O. Cat. Vol. II, pt. II, No. 6859 and No. 8111.

गुरुगीतास्तोत्र Gurugītāstotra

No. 870 463. 1883-81.

Size.— 7½ in. by 4 in.

Extent.— 28 leaves; 7 lines to a page; 18 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; hand-writing clear, legible and uniform; folios have no border lines; right-hand edges of folios 27-28 cut off.

Age.— Not very old.

Author.— Vyāsa.

Subject.— A work treating of the attributes of a spiritual guide, said to be from the Uttarakhaṇḍa of the Skandapurāṇa.

Begins.— fol. 1b

श्रीगणेशाय नमः ॥ श्रीमद्गुरुचरणाभ्यां नमः ॥
श्रीगुरुगीतास्तोत्र लिख्यते ॥
तत्रादौ आसनविधिः ॥

वस्त्रासने दरिद्रस्यात्पाषाणे रोगसंभवः ॥
मेदिन्यां दुःखमाप्नोति काष्ठे भवति निःफलं ॥ १ ॥ etc.

Ends.— fol. 28b

संसारसागरसमुत्तरणैकमंत्रं ॥
ब्रह्मादिदेवमुनिपूजितसिद्धमंत्रं ॥
दारिद्रदुःखभयशोकविनाशमंत्रं ॥
वंदे महाभयहरं गुरुराजमंत्रं ॥ ९ ॥
इति श्रीस्कंदपुराणे उत्तरखंडे ईश्वरपार्वतीसंवादे गुरुगीता समाप्ता ॥
॥ ईश्वरार्पणमस्तु ॥ श्रीरस्तु ॥ ॐ ॥ शुभं भवतु ॥ ॐ ॥

References.— See No. 869

गुरुगीतास्तोत्र Gurugītāstotra

No. 871 55. A. 1882-83.

Size.— $9\frac{1}{4}$ in. by $4\frac{1}{8}$ in.

Extent.— 11 leaves; 8 lines to a page; 28 letters to a line.

Description.— Country paper; Devanāgarī characters; folios slightly worn out; hand-writing bold clear, legible and uniform; verse-numbers marked with red pigment; borders ruled in double black lines; complete.

Age.— Saṁvat 1761 (= A. D. 1705).

Author.— Vyāsa.

Begins.-- fol. 1[b]

श्रीगणेशाय नमः ॥

कैलासशिखरे रम्ये etc. as in No. 869

Ends.— fol. 10[b]

अतिव चितपकस्यं etc. up to गुरुगीता कदाचिनः ॥ १३८ ॥ as in No. 869

followed by इति श्रीस्कंदपुराणे उत्तरखंडे ईश्वरपार्वती संवादे गुरुगीतास्तोत्र संपूर्णम् ॥ शुभमस्तु ॥ गुरुगुरुगुरुसत्य संवत् १७६१ वर्षे सोरठदेशे त्रिनेत्रस्थाने लिखितं ॥ श्रीगुरुगुरुगुरुवे नमः ॥

References.— See No. 869

गुरुगीतास्तोत्र Gurugītāstotra

No. 872 111. 1899-1915.

Size.— $8\frac{1}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 19 leaves; 7 lines to a page; 22 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing bold, legible and uniform; borders ruled in double red lines and edges in single; red ink used for

topical headings, daṇḍas and border-lines; yellow pigment frequently used for corrections: complete.

Age.— Appears to be old.

Author.— Vyāsa.

Begins.—fol. 1[b]

श्रीगणेशाय नमः ॥

॥ ॐ अस्य श्रीगुरुगीतास्तोत्रमंत्रस्य सदाशिवऋषि विराट् छंदः etc.

Ends.—fol. 18[b]

संसारसागर etc. up to गुरुराजमंत्रं ॥ ४५ ॥ as in No. 870 followed by इति श्रीस्कंदपुराणे उत्तरखंडे ईश्वरपार्वती संवादे गुरुगीता संपूर्णा ॥ ॥ ॐ तत्सत् ॥ शुभं भवतु ॥ ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥ छ ॥

References.— See No. 869

गुरुगीतास्तोत्र — Gurugītāstotra

No. 873 — 154. 1884-87.

Size.— 8 in. by 4 in.

Extent.— 22 leaves; 7 lines to a page; 18 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing bold, clear, legible and uniform; borders ruled in double red lines; complete.

Age.— Appears to be old.

Author.— Vyāsa.

Begins.—fol. 1[b]

श्रीगणेशाय नमः श्रीगुरभ्यो नमः ॥

ॐ अस्य श्रीगुरुगीतास्तोत्रमंत्रस्य परम शिवऋषिः विराट् छंदः श्रीगुरु-परमात्मा देवता etc.

Ends.—fol. 22[b]

संसारसागर etc. up to गुरुराजमंत्रं ५२ as in No. 870. followed by ॐ तत्सदिति श्रीस्कंदपुराणे ईश्वरपार्वतीसंवादे गुरुगीता-स्तोत्र संपूर्ण ॥ समाप्ता

References.— See No. 869.

गुरुगीतास्तोत्र Gurugītāstotra

No. 874 133. 1891-95.

Size.— $7\frac{1}{4}$ in. by $3\frac{3}{4}$ in.

Extent.— 13 leaves ; 10 lines to a page ; 22 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; no border-lines for the folios ; complete.

Age.— Appears to be old.

Author.— Vyāsa.

Begins.—fol. 1[b]

श्रीगणेशाय नमः ॥

श्रीसूत उवाच ।

कैलासशिखरे रम्ये etc. as in No. 869.

Ends.--fol. 13[b]

संसारसागर समुद्धरणैक मंत्रं etc. up to गुरुराजमंत्रं as in No. 870. followed by--

इति श्रीस्कंदपुराणे उत्तरखंडे ईश्वरपार्वतीसंवादे गुरुगीतास्तोत्रं संपूर्णं शुभं भूयात् श्रीरस्तु कल्याणमस्तु लेखकपाठकयोः ॥ श्री श्री ॥

References.— See No. 869.

गुरुगीतास्तोत्र Gurugītāstotra

No. 875 204. 1887-91.

Size.— 8 in. by $3\frac{7}{8}$ in.

Extent.— 18 leaves ; 9 lines to a page ; 24 letters to a line.

Description.— Country paper ; Devanāgarī characters ; not very old in appearance ; hand-writing clear, legible and uniform ; daṇḍas in red ink ; complete.

Age.— Śaka 1732 (= A. D. 1810).

Author.— Vyāsa.

Begins.—fol. 1[b]

श्रीगुरुपादुकाभ्यां नमः ॥

ॐ अस्य श्रीगुरुगीता स्तोत्रमालामंत्रस्य ॥

भगवान्सदाशिवऋषिः ॥ श्रीगुरुर्देवता ॥ अनुष्टुप् छंदः ॥ etc.

fol. 3[a] कैलासशिखरे रम्ये etc. as in No. 869.

Ends.—fol. 18[a]

संसारसिंधुसलिलोत्तरणैकमंत्रं
ब्रह्मादि देव मुनिपूजित सिद्धमंत्रं
दारिद्र्यदुःखभयशोकविनाशमंत्रं
वंदे सदा भयकरं गुरुनाम मंत्रं २०१

इति श्रीस्कंदपुराणे उत्तरखंडे शिवपार्वती संवादे गुरुगीता स्तोत्रं संपूर्णमस्तु श्रीगुरु श्रीकृष्ण जयराम काशिराजार्पणमस्तु शके १७३२ प्रमोद नाम संवत्सरे बाहुल बहुल युगल भद्रायां नारायणरायस्यांकितेन लिखितमिति ज्ञेयं श्रीगुर्वर्पणमस्तु श्रीनारायण गुरु श्रीनारायण गुरु श्रीनारायण गुरु श्रीनारायण

Refrences.— See No. 869.

गुणरत्नकोशस्तोत्र — Guṇaratnakośastotra

No. 876 — 441. / 1899-1915.

Size.— $12\frac{1}{2}$ in. by $5\frac{7}{8}$ in.

Extent.— 6 leaves; 11 lines to a page; 40 letters to a line.

Description.— Smooth country paper; Devanāgarī characters; hand-writing beautiful, legible and uniform; borders ruled with double red lines; red pigment used for marking verse-numbers and yellow for making corrections; complete.

Age.— Saṁvat 1892 (= A. D. 1836).

Author.— Bhaṭṭācārya.

Begins.—fol. 1[b]

॥ श्रीरामचंद्राय नमः ॥ श्रीवत्सचिह्न मिश्रेभ्यो नमः ॥

उक्तिमधीमहि ॥ यदुक्तयस्त्रयी कंठे नयंति मंगलसूत्रतां ॥

श्रीपराशर भट्टार्य्यः श्रीरंगेश पुरोहितः॥
श्रीवत्सांकसुतः श्रीमान् श्रेयसे मेस्तु भूयसे ॥
श्रियै समस्त चिदचिद्विधान व्यसनं हरेः ॥
अंगीकारिभिरालोकैः सार्थयंत्यै कृतोंजलिः॥ १ ॥ etc.

Ends.--fol. 6[a]

इत्युक्ति कैतवशतेन विडंबयामि ।
तानं वसत्यवचसः पुरुषान् पुराणान् ॥
यद्वा नमे भुजवलं तव पादपद्म—
लाभे त्वमेव शरणं विधितः कृतोस्मि ॥ ६० ॥
श्रीरंगे शरदां शतं सह सुहृद्वर्गेण निष्कंटकं ॥
निर्दुःखं सुसुखं चदास्य रसिकां भुक्त्वा समृद्धिं परां ॥
युष्मत्पादसरोरुहांतररताः स्यामत्वमंवायिना ॥
सर्वे च त्वमपि त्वमेव भवनः स्वीकुर्व कस्मात् कृपां ॥ ६१ ॥
इति श्रीभट्टाचार्य्यकृतिषु श्रीगुणरत्नकोशस्तोत्रं संपूर्णम् ॥ संवत १८९२ ॥ राम राम

॥ गुणरत्नकोशस्तोत्रं भट्टाचार्यविनिर्मितं ।
लेखितं विश्वनाथेन वैष्णवानां परं प्रियं ॥ १ ॥

References.— Mss. Aufrecht's Catalogus Catalogorum I, 155[a]; III, 33[b].

गुणरत्नकोश

Guṇaratnakośa

No. 877

192 (xiv).
1887-91.

Size.— $5\frac{3}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 49[a] to 67[b] leaves; 8 lines to a page; 15 letters to a line.

Description.— See विष्णोर्दिव्यसहस्रनाम No. 192 (i). 1887-91.

Age.— Fairly old.

Author.— Not mentioned.

Begins.--fol. 49[a]

श्रीमते रामानुजाय नमः ॥

ॐ श्रीपराशरभट्टार्यः श्रीरंगेश पुरोहितः ॥
श्रीवत्सांकसुत श्रीमान्श्रेयसे मेस्तु भूयसे ॥ १ ॥ etc.

Ends.--fol. 67^{b}

श्रीरंगे शरदां शतं सहसुहृद्वर्गेण निष्कंटकं ।
निर्दुःखं सुमुखं च दास्य रसिकां भुक्त्वा समृद्धिं परां ॥
युष्मत्पादसरोरुहांतररताः श्यामत्वमं वापिता ।
सर्वे च त्वमपि त्वमेव भवतःस्वीकुर्व कस्मात्कृपां ॥ ६२ ॥

इति श्रीगुणरत्नकोश

References.— See No. 876.

गुणरत्नकोश with टीका — Guṇaratnakośa with commentary

No. 878 — 390. 1887-91.

Size.— 12$\frac{1}{8}$ in. by 5$\frac{3}{4}$ in.

Extent.— 19 leaves; 1-10 lines to a page; 35-36 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing very careless and incorrect; red and yellow pigment frequently used; text in the middle of folios and the commentary above and below it; complete.

Age.— Appears to be pretty old.

Author (of the text).— Bhaṭṭācārya.

„ („ „ comm.).— Rāmānujācārya.

Begins.-- (text) fol. 1^{b}

श्रीपराशरभट्टार्यः etc. as in No. 876.

„ (com.) fol. 1^{b}

श्रीमते रामाय नमः ॥

लक्ष्मीकटाक्षनिक्षेपा रक्षणैकक्रतक्षणाः ॥
रक्षंतूत्कूलकरणाः संवुक्षित जगत्रयाः ॥ १ ॥

अथ सर्वेश्वरानुमतानुरूप गुणविभवां सकल पुरुषार्थ प्राप्तौ सकल चेतनानां सर्वेश्वरं प्रति पुरुषकारभूतां सर्वेश्वरवत्स्वयमपि प्राप्य प्रापकभूताश्रियं सकलजनोजीवनार्थं च स्तोतुकामः प्रबंधादौ तामेव प्रणमति etc.

Ends.-- (text) fol. 19[a]

इत्युक्तिकैतवशतेन etc. up to स्वीकुर्व कस्मात् कृपा as in No. 876.

Ends.-- (com.) fol. 19[a]

इत्थं स्तोत्रं परिसमाप्य प्रारब्धकर्मपर्य्यंतं शरीरस्थितिमालोच्य स्वमनोरथशेषं प्रार्थयते निःकंटकादि पदत्रयं क्रियाविशेषणं दास्यरससहितां दास्यसमृद्धिमिति यावत् सुहृद्भिः सह शतायुर्वै पुरुष इत्युक्त्या आयुरवसानपर्य्यंतं दास्यमेवानुभुज्य अतः परमपि युवयोः पादपद्मे रता भवेम अस्माकं मातापितृप्रभृति सर्वं त्वमेव तस्मादकस्मात्कृपां निर्हेतुकदया अस्मद्विषये स्वीकुरुष्वेति सर्वं समंजसं सुखपूर्वकं जातमित्यर्थः

इति श्रीरामानुजार्यविरचितं श्रीगुणरत्नकोशव्याख्यान संपूर्णं समाप्तं ॥ श्रीहरि

References.— See No. 876.

गुरुप्रशंसा

Guruprasaṃsā

No. 879

928 (2).
1887-91.

Size.— 8 in. by $5\frac{1}{5}$ in.

Extent.— 3 leaves ; 18 lines to a page ; 30 letters to a line.

Description.— Country paper; Śaradā Characters ; Hand-writing clear, legible and uniform.

A treatise dealing with the praise of *guru* or spiritual teacher. It seems to form part of *Nandipurāṇa* or *Nandikeśvarapurāṇa.*

Age.— Appears to be fairly old.

Author.— Anonymous.

Begins.-- folio 21[b]

ॐ नमो माहामायायै ॐ नमामि सद्गुरुं शांतं प्रत्यक्ष शिवरूपिणम्
शिरसा योगपीठस्थं मुक्तिकामार्थ सिद्धये ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुः साक्षान्महेश्वरः ।
त्रैलोक्यनाथो भगवांस्तस्मै श्रीगुरवे नमः ॥
अखंड मंडलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

अथ नंदिपुराणे गुरुप्रशंसा

ये लोका यज्ञशीलानां श्रुतिस्मृति विधिं तथा ।
त्रैलोक्यं प्राप्यते वश्यं पुण्यवद्भिर्नरोत्तमैः ॥
गुरुमाराधयन्नेन विद्याः कामानपारगम् ।
शक्त्या भक्त्या प्रणामेन धनैः सर्वैर्गुणैस्तथा ॥

Ends.—folio 22b

तुष्टेन गुरुणा देवि सर्वं तुष्टं जगद्भवेत् ।
गुरौ रुष्टे नैव पूजां गृण्हाति परमेश्वरः ॥
गुरुराग्निर्भवेद्देवि क्रोधाद्भस्म करोति च ।
सप्तजन्मार्जिता सिद्धौ तस्मात्तं न प्रकोपयेत ॥
सहस्रं ब्राह्मणानां तु वेदवेदांग सेविना ।
अग्निहोत्र प्रसक्तानां नित्यं यज्ञोपसेविनाम् ॥
गुरुरेको भवेद्देवि कलां नार्धंति षोडशीं ।
यावन्न गुरुणा भुक्तं मिष्टमन्नमपाचतम् ॥
शिष्यस्तावन्न भुंजीतत्वित्याह भगवान् शिवः ।
तद्भुक्तं यद्गुरुर्भुंक्ते सा शया यत्र स स्वपेत् ॥
सैव सेवा गुरोर्यातु तद्धनं यद्गुरोर्ददेत् ।
तद्वस्त्रं यद्गुरोर्दत्तं सावुद्धिर्या तु तत्परा ॥
उच्छिष्टं गुरुशेषं तु अभिनंद्य तु भक्षयेत् ।
स्वहस्तेन ददेदन्नं चौरीं कृत्वाभिनंदयेत् ॥
प्राशनाल्लभते सिद्धिं कल्मषस्य क्षयो भवेत् ।
सप्तजन्मार्जितं पापं नाशमायाति सुंदरि ॥
सर्वसिध्यारुहच्चैव यथोक्त फलभुग्भवेत् ।
चांद्रयन शतैस्तुल्यं सोमपान सहस्रकैः ॥
एतत्फलमवाप्नोति गुरोच्छिष्टस्य भोजनात् ।
तपनारभ्य.....मेकाक्षरं वदेद्धियः ॥
स गुरुः पापहा देवि मत्समो नास्ति संशयः ।
गुरुनिंदां न कुर्वीत श्रृणुयान्नाप्यथान्यतः ॥
श्रृण्वतो नाशमायाति यत्कृतं पारलौकिकं ।
गुरोः शास्त्रस्य शैवस्य शिवस्यापि विशेषतः ॥
निंदा न श्रृणुयाज्जातु न तु कुर्यात्कदाचन ।
एतेषां निंदकं हन्या न वा दूरतरं व्रजेत् ॥

fol. 23a कर्मणा मनसा वाचा गुरोराज्ञा न लंघयेत् ॥ इति गुरुप्रशंसा समाप्ता ॥

गोकुलाष्टक — Gokulāṣṭaka

No. 880 — 110 (viii). 1895-98.

Size.— $5\frac{1}{4}$ in. by $8\frac{1}{8}$ in.

Extent.— 15^b to 16^b leaves ; 13 lines to a page ; 12 letters to a line.

Description.— For description see वल्लभाष्टक No. 110 (i). 1895-98.

Age.— Fairly old.

Author.— Raghunātha.

Begins.—fol. 15^b

श्रीकृष्णाये नमः श्रीः ॥

नंदगोपभुपवंसभुषणं ।
भूमिभूरिभाग्य भाजनं भयापहं ॥
धेनुधर्मरक्षणावतीर्णा पूर्ण विग्रहं नीलवारिवाह
कांति गोकुले समाश्रये ॥ १ ॥ etc.

Ends.—fol. 19^b

वासरावसान गोष्टगोगणानुगं धेनु ।
दोहगेहंगेहमोहविस्मयक्रियं ॥
स्वीय गोकुलेषु दानदत्र भक्तरक्षणं ।
निलवारी वाहकांति गोकुले समाश्रये ॥ ८ ॥

इति श्रीरघुनाथकृतौ गोकुलाष्टक संपूर्ण ॥

References.— Mss. Aufrecht's Cat. Catalogorum III, 34^b.

गोकुलेशाष्टकविवृत्ति — Gokuleśāṣṭakavivṛtti

No. 881 — 712. 1884-87.

Size.— $9\frac{1}{8}$ in. by $5\frac{1}{4}$ in.

Extent.— 24 leaves ; 12 lines to a page ; 35 letters to a line.

Description.— Thick country paper ; Devanāgarī characters ; old and discoloured ; hand-writing somewhat careless and not quite legible and clear ; borders ruled in single black lines ; edges of folios extremely moth-eaten ; the written portion of the folios is turned black owing to the diffusion of ink.

Age.— Appears to be old.

Author.— Harirāya.

Begins.--fol. 1[b]

श्रीविट्ठलाय नमः ॥

जयंति श्रीमंतो जगति करुणासिंधुतनव-
स्त एव स्वाचार्या य इह कृपयंतः सुरतरु ।
विधर्मग्रस्तांतः करणमतिशून्येषु सरसं ।
स्फुटीचक्रुः स्वीयं दुराधिगमवर्त्माद्भुतमिदं ॥ १ ॥
यन्मार्गं स्वीकारे ह्यपेक्षते नैव साधनम् किमपि ।
स जयति कृपारसार्द्रः स्वीये श्रीविट्ठलाधीशः ॥ २ etc.

Ends.—fol. 24[b] The portion cannot be read as the letters are quite illegible.

इति श्रीहरिरायविरचितं गोकुलेशाष्टकविवृत्तिः

गोपालमङ्गल Gopālamaṅgala

No. 882 258 (ii). 1880-81.

Size.— $11\frac{3}{4}$ in. by $5\frac{1}{2}$ in.

Extent.— 1[a] ; 11 lines to a page ; 35 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; complete.

Age.— Appears to be fairly old.

Author.— Not mentioned.

Begins.--fol. 1[a]

अस्तु गोपाल बालाय नित्याय परमात्मने ।
भक्तवात्सल्य निधये नित्य भोग्यीय मंगलं ॥ १ ॥ etc.

Ends.—fol. 1[a]

श्रीवादिभीकरायेंण श्रीसौम्यवरयोगिनः ।
लब्धाय गोपबालाय नित्यश्रीर्नित्यमंगलं । १२ ॥

इति श्रीगोपालमंगलं संपूर्ण

गोपालसहस्रनामस्तोत्र with टीका

Gopālasahasranāmastotra with commentary

No. 883 481. 1895-98.

Size.— $10\frac{7}{8}$ in. by $4\frac{5}{8}$ in.

Extent.— 56 leaves; 8-10 lines to a page; 30-32 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing bold, legible and uniform; text in the middle and the commentary above and below the text; borders ruled with double red lines; red and yellow pigment frequently used; complete.

Age.— Saṁvat 1818 (= A. D. 1762).

Author (of the text).— Not mentioned.

,, (,, ,, comm.).— Raṇachoḍadāsa.

Begins.—(text) fol. 1b

॥ श्रीरामजी ॥

कैलासशिखरे रम्ये गौरी प्रच्छति शंकरम् ।
ब्रह्मांडाखिलनाथस्त्वं सृष्टिसंहारकारकः ॥ १ ॥
त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः ।
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर ॥ २ ॥

Begins.— (com.) fol. 1b

श्रीकृष्णाय नमः ॥

श्रीहंसं श्रीकुमारांश्च वंदे देवर्षिपुंगवं ॥
श्रीनिम्बादित्यमुख्यांश्च संप्रदायप्रवर्त्तकान् ॥ १ ॥
श्रीशुकुंदं गुरुं वंदे मनसा शिरसा गिरा ॥
यत्कृपा वैभवाल्लब्ध्वा श्रीकृष्णध्यान पद्धतिः ॥ २ ॥
नमः कृष्णाय देवाय श्रीधूलीलारताय च ॥
सच्चिदानंदरूपाय गुरवे बुद्धिसाक्षिणे ॥ ३ ॥
श्रीकृष्णगुणमाधुर्य लीलासंसक्तमानसः ॥
गोपाल नाम साहस्रं विवृणोमि यथामति ॥ ४ ॥ etc.

Ends.—(text) fol. 55ᵇ

श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ॥
यस्य गेहे सहस्रं च नाम्नां तिष्ठति पूजितं ॥ १९१ ॥

ॐ तत्सदिति श्रीसंमोहनतंत्रे पार्वतीहरसंवादे श्रीगोपालसहस्रनाम-स्तोत्रं समाप्तम् ॥ १ ॥

Ends.—(com.) fol. 55ᵇ

हे महादेवि यस्य गृहे नाम्नां सहस्रं पूजितमपि तिष्ठति किं पुनरभ्यस्तं तस्य गृहे सदा सर्वस्मिन्काले श्रीगोपालो वसेदिति ॥ १८१ ॥ श्रीराधाकृष्णाय नमो नमस्तराम् ॥ १८१ ॥

गोपाल हे परम हे भुवनैकबंधो ।
श्रीकृष्ण हे यदुपते करुणैकसिंधो ॥
श्रीमन्मुकुंदयदुनंदनदेव देव ।
रक्षस्व मां करुणयार्द्र दृशावलोक्य ॥ १ ॥
अतसी पुष्पसंकाशं राधादक्षे सुसंस्थितं ।
वृंदावन निकुंजस्थं शखीभि शरणं वृणे ॥ २ ॥
श्रीमद्गोपालवेसस्य हरेर्नाम सहस्रकं ।
विवृत्तं स्वीय बोधाय यथा पाठं यथा मति ॥ ३ ॥
ईक्षंतां स्वेच्छया संतः कृष्णपादानुरागिणः ।
क्षमंतां यच्च चापल्यं मदीयं दीनवत्सलाः ॥ ४ ॥

इति श्रीसनकसंप्रदायप्रवर्त्तकाचार्य श्रीनिम्बार्कमतानुयायि श्रीमन्मुकुंद-शरणपादपद्ममकरंदभृंगेण श्रीमद्रणछोडदाससूरिणा कृता श्रीमद्गोपाल-सहस्रनामविवृत्तिः संपूर्तिमगात् शुभमस्तु ॥

लिपीकृतं मया व्रजदासेन श्रीसवाईजयनग्रमध्ये स्वात्मार्थं लेखकपाठक-योर्शुभं भूयात् ॥

मितौ आश्विनकृष्णामावस्यां संवत ॥ १८१८ ॥ का मै लिखी व्रजदास छै

References.— Mss. Aufrecht's Cat. Catalo. I, 163ᵃ; II, 33ᵃ; III, 35ᵃ.

See Des. Cat. of Govt. Mss. Lib. Madras, Vol. XVII, No. 8923.

गोविन्ददशश्लोक Govindadaśaśloka

No. 884 $\frac{192\ (x).}{1887\text{-}91.}$

Size.— $5\frac{3}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 38^b to 40^b leaves ; 8 lines to a page ; 14 letters to a line.

Description.— See विष्णोर्दिव्यसहस्रनाम No. $\frac{192\ (i).}{1887\text{-}91.}$.

Age.— Fairly old.

Author.— Not mentioned.

Begins.--fol. 38^b

गोविंदगोकुलपते वसुदेवसूनो ।
गोपालकृष्णगरुडध्वज गोपनाथ ॥
श्रीवासुदेव पुरुषोत्तम पद्मनाथ ।
त्रायस्व केशव हरे शरणागतं मां ॥ १ ॥ etc.

Ends.—fol. 40^b

दशश्लोकमिदं पुण्यं स्तोत्रं कृष्णशरण्यदं ।
सर्वपापप्रणाशं च पठितं मुक्तिदं नृणां ॥ १० ॥

इति श्रीगोविंददशश्लोक

गोविन्ददामोदरस्तोत्र Govindadāmodarastotra

No. 885 $\frac{274.}{1895\text{-}98.}$

Size.— $6\frac{1}{8}$ in. by $4\frac{1}{5}$ in.

Extent.— 10 leaves ; 8 lines to a page ; 18 letters to a line.

Description.— Country paper ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders of some folios in double red lines not properly ruled ; complete.

Age.— Saṁvat 1905 (= A. D. 1849).

Author.— Bilvamaṅgala.

Begins.—fol. 1^b

श्रीगणेशाय नमः ॥
अग्रे कुरुणामथ पांडवानां दुःशासनेन हृतवस्त्रकेशा ॥
कृष्णा तदाक्रोशदनन्यनाथ गोविंददामोदरमाधवेति ॥ १ ॥ etc.

Ends.—fol. 9ᵇ

नारायणानंत हरे नृसिंह प्रह्लाददुःखार्त्त हरे कृपालो ।
जिह्वेऽसिस्वासृतमेतदेव ॥ गोविंद ॥ ६८ ॥
लीला मनुष्याकृत रामरूपे प्रतापदासीकृत सर्वभूप ।
जिह्वेपि वस्वासृतमेतदेव ॥ गोविंददामोदर माधवेति ॥ ६९ ॥
इति श्रीबिल्वमंगलविरचिते गोविंददामोदरस्तोत्र संपूर्ण सं। १९०५

References.— Mss. Aufrecht's Cat. Catalo. I, 168ᵇ; II, 34ᵇ; III, 36ᵃ.

गोविंदस्तोत्र — Govindastotra

No. 886 — 499. / 1891–95.

Size.— 8¼ in. by 3⅝ in.

Extent.— 3 leaves; 5 lines to a page; 25 letters to a line.

Description.— Country paper thickish, grey and well-preserved; Devanāgarī characters; hand-writing bold, clear and uniform; verse endings indicated by red punctuation marks. Occasional use of yellow pigment for corrections. Red ink used for beginning and colophon for alternate letters. Contains only 14 verses, taken from the Carpaṭapañjarikā and Carpaṭaśata.

Age.— Fairly old.

Author.— Śaṅkarācārya.

Begins.—fol. 1ᵇ

॥ श्रीगणेशाय नमः ॥
भज गोविंदं भज गोविंदं गोविंदं भज मूढमते ॥
प्राप्ते संनिहिते मरणे नहि नहि रक्षति डुकृञ् करणे ॥ १ ॥ etc.

Ends.—fol. 3ᵇ

कोहं कस्त्वं कुत आयातः को मे जननी को मे तातः ॥
इति परिभावित सर्वासारं सर्वं त्यक्त्वा स्वप्नविकारं ॥ १४ ॥
इति श्रीशंकराचार्यविरचितं गोविंदस्तोत्रं समाप्तः ॥
हरे राम हरे राम राम राम हरे हरे ॥
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥
भज गोविंदं भज गोविंदं गोविंदं भज मूढमते १४ इति श्री

गोविन्दाष्टक Govindāṣṭaka

No. 887 655. 1895-1902.

Size.— $6\frac{7}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 2 leaves; 9 lines to a page; 18 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing bold, legible and uniform; borders in two double red lines not properly ruled; right-hand edges of folios moth-eaten; complete.

Age.— Appears to be fairly old.

Author.— Śaṅkarācārya.

Begins.—fol. 1[a]

श्रीगणेशाय नमः ॥

सत्यं ज्ञानमनंतं नित्यमनाकाशं गोष्टप्रांगणरिंगणलोलमनायासं परमायासं मायाकल्पित नानाकारमनाकारं भुवनाकारं क्ष्मामानाथमनाथं प्रणमत गोविंद परमानंदं ॥ १ ॥ etc.

Ends.—fol. 2[b]

गोविंदाष्टमेतं दधिते गोविंदार्पितचेतयोः ॥
गोविंदाच्युत माधवविष्णो गोकुलनायक कृष्णेति ॥ ९ ॥
गोविंदाघ्रि सरोज ध्यानसुधाजलधौत समस्ताघौ ॥
गोविंदं परमानंदां मृतस्तं सुखमभ्यति ॥ १० ॥
श्रीमच्छंकराचार्यविरचितं गोविंदाष्टक संपूर्ण ॥

References.— Mss. Aufrecht's Catalogus Catalogorum I, 169[b] II, 34[a]; III, 36[b].

Des. Catalogues— A. S. B. Cat. Vol. VII, No. 5711 and 5712. I. O. Cat. Vol. II, Part II, No. 7077.

Printed in Kāvyakalāpa 1, 119.

गोविन्दाष्टक with टीका

Govindāṣṭaka with Commentary

No. 888 — 273. 1895–98.

Size.— 12½ in. by 5¾ in.

Extent.— 10 leaves ; 2 lines to a page ; 20-25 letters to a line. (text)
8 ,, ,, ,, ,, 35 ,, ,, ,, ,, (com.)

Description.— Country paper ; Devanāgarī characters hand-writing clear, legible and uniform ; text in the middle of the folios and the commentary above and below it ; complete ; very incorrect Ms.

Age.— Saṁvat 1915 ; Śaka 1780 (= A. D. 1858).

Author (of the text).— Śaṅkarācārya.

,, (,, ,, comm.).— Ānandagirī.

Begins.—(text) fol. 1b

सत्यं ज्ञानमनंतं नित्यमनाकाशं परमाकाशं ।
गोष्ट प्रांगणारि(रिं)गणलोलमनायासं परमायासं ॥
मायाकल्पित नानाकारमनाकारं भुवनाकारं ।
क्षमामानाथमनाथं प्रणमत गोविंदं परमानंदं ॥ १ ॥

,,—(com.) fol. 1b

॥ श्रीगोविंदाय नमः ॥

स्विति श्रीपरमपुरुषं परमेश्वरं प्रणमति इह खलु सकललोकहितावतारो भगवान्महाविष्णुः स्वयंभुवा सुरारिचय वधायाभ्यर्थितो भूभारपरिजिहीषया-यदकुले किलावतीर्णः सनकादिमुनिजनैरनुगीय मानसच्चरितो भगवान्नदवेश्मनि विजहार विहारमष्टभिः श्लोकैः सत्यमित्यादिभिरुपवर्णयन् भगवत्पूज्यपाद मुनिर्निस्तसमस्त विशेषं सच्चिदानंदाद्वयं परमात्मानमभिष्टौति । etc.

Ends.— (text) fol. 10b

गोविंदाष्टकमेतदधीते गोविंदार्पितचेतायो ।
गोविंदाच्युत माधवविष्णो गोकुलनायक कृष्णेति ॥
गोविंदांघ्रि सरोज ध्यानसुध्यान सुधाजन धौतसमस्ता ।
यो गोविंदं परमानंदामृत संतस्थं समभ्येति ॥

Ends.— (com.) fol. 10[a]

प्रक्षालिता शेशेषयायैघो भूत्वा गोविंदं परमानंदामृतं मरणादिरहित-मंतस्थं सुखमभ्येति सम्याङ्निरूपद्रवसन्नाप्नोति मद्भक्ता यांति मामपीति भगवद्वचनात ।

इति श्रीगोविंदाष्टकानंदागिरीयं समाप्तं सव्वत १९१५ का साके १७ सतरास ८० का मीती चैत्र शुक्र लीखितं जानकीवलभजीका मंदीरम-लिखि लक्ष्मीनारायणदास कृष्णऽको लिखायतं व्रजवलभजी भ्राता पुजारि-जिका छजी ।

References.— See No. 887

For Com. See I. O. Cat. Vol. II, pt. I No. 5943. Published in the Devīstotra Kadamba, edited by S. Viśva-nātha Śāstrī, Madras, 1914.

गोविन्दाष्टक with टीका

Govindāṣṭaka with Commentary

No. 889

351.
1884-87

Size.— 11¾ in. by 5½ in.

Extent.— 7 leaves ; 11 lines to a page ; 45 letters to a line.

Description.— Country paper ; Devanāgarī characters ; whitish in appearance ; hand-writing clear, legible and uniform ; red pigment occasionally used but yellow pigment used frequently for corrections ; complete.

Age.— Does not appear to be very old.

Author (of the text).— Śaṅkarācārya.

,, (,, ,, comm.).— Ānandagirī (?)

See A. S. B. Cat. No. 5711.

Begins.—(text) fol. 1[b]

सत्यं ज्ञानमनंतं etc. as in No. 888

,,—(com.) fol. 1[b]

॥ श्रीपरमात्मने नमः ॥

श्रीमत्पूर्णार्थ कृष्णस्य पादपंकेरुहद्वयं ।
प्रणम्य क्रियते टीका गोविंदाष्टकगा मया ॥ १ ॥

इह खलु सकललोकहितावतारो भगवान् महाविष्णुः स्वयंभुवासुरारिचय वधायाभ्यर्थितो भूभारपरिजिहीर्षया यदुकुले किलावतीर्णः सनकादिमुनिजनैरनुगयिमान सच्चरितो नंदवेश्मनि विजहार etc.

Ends.—(text) fol. 7^b

गोविंदाष्टकमेतदधीते etc. up to समभ्येति as in No. 888

,,—(com.) fol. 7^b

यस्त्वेतद्गोविंदाष्टकमनुदिनं भक्तः पठति सकामश्चेत्काम्यफलं प्राप्नोति निष्कामश्चेत् मोक्षमुपैतीति स्तोत्रपाठकानां फलं कीर्त्तयति गोविंदेति यस्तु निरंतर गोविंदार्पितचेताः सन् एतद्गोविंदाष्टकमधीते स गोविंदाच्युत माधव विष्णो गोकुलनायक कृष्णेति एतानि नामानि कीर्त्तयन् गोविंदांघि सरोजसुधाजल धौतसमस्तायः प्रक्षालिता शेषपापो भूत्वा गोविंदं परमानंदममृतं मरणादि रहितं अंतस्थं समभ्येति सम्यक् निरुपद्रवः प्राप्नोति मद्भक्ता यांति मामपि इति भगवद्वचनात् अपीत्यर्थः ॥ ९ ॥

इति श्रीशंकराचार्य्यविरचितं गोविंदाष्टक टीका संपूर्णा ॥

References.— See No. 888 above.

गोविन्दाष्टक with टीका

Govindāṣṭaka with Commentary

No. 890

395.
1887-91.

Size.— $12\frac{3}{4}$ in. by $5\frac{1}{2}$ in.

Extent.— 5 leaves ; 2 lines to a page ; 32 letters to a line. (text)

9-10 ,, ,, ,, ,, 52 ,, ,, (com.)

Description.— Country paper ; Devanāgarī characters ; handwriting beautiful and legible but not uniform ; text in the middle of folios and the commentary above and below it ; yellow pigment used in one or two places for corrections ; complete.

Age.— Saṁvat 1854 (= AD. 1798)

Author.— (of the text) — Śaṅkarācārya.

Begins.—(text) fol. 1[a]

सत्यं ज्ञानमनंतं etc. as in No. 888

,, (com.)—fol. 1[a]

श्रीगणेशाय नमः ॥

श्रीमत्पूर्णार्थ कृष्णस्य etc. as in No. 889

Ends.— (text) fol. 5[b]

गोविंदाष्टकमेतदधीते etc. up to समभ्येति ॥ ९ ॥ as in No. 888

,,—(com.) fol. 5[b]

यस्त्वेतद्गोविंदाष्टकमनुदिनं etc. up to अपित्यर्थः ॥ ९ ॥
as in No. 889

followed by—इति श्रीशंकराचार्य्यविरचितं गोविंदाष्टकटीका समाप्ता शुभं भूयात् । लेखकपाठकयोः मिति कार्त्तिक कृष्णपक्षे संवत् १८५४ लिप्यकृतं पठनार्थं केसवसर्म्मणस्य शुभं भवतु ॥

श्रीगोविंदाय नमः श्रीरामजीः

हयपृष्ठ कटिग्रिवा उर्द्धमुष्टिरधोमुखं ।
कष्टेन लिखते ग्रंथ यत्नेन परिपालयेत ॥

References.— See No. 888.

गोविन्दाष्टक
(सटिप्पण)

Govindāṣṭaka
(with Tippaṇa

No. 891

347-E
1899-1915.

Size.— 12⅝ in. by 5⅜ in.

Extent.— 6 leaves ; 16 lines to a page ; 44 letters to a line.

Description.— Country paper ; thin, grey and worn out ; Devanāgarī characters ; handwriting medium, clear and uniform.

Age.— Fairly old.

Author. – Text—Śaṅkarācārya.

Comm.—Ānandagirī.

Begins.-- fol. 1[b]

॥ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

इह खलु सकललोक हितावतारो भगवान् महाविष्णुर्भुवने तयाऽभ्यार्थितो भूभार परिजिहीर्षया यदुकुले किलावतीर्णः सनकादिमुनिजनैरनुदिनमनुगीयमानसच्चरितो भगवान्नंदवेश्मनि विजहार ॥ etc.....भगवान् ॥ पूज्यपादमुनिर्निरस्त समस्त विशेषं सच्चिदानंदाऽद्वयं परमात्मानमभिष्टौति ॥ सत्यमित्यादिना etc.

Text :— ॥ श्रीगणेशाय नमः ॥ श्रीगोविंदाय नमः ॥

सत्यं ज्ञानमनंतं नित्यमनाकाशं परमाकाशं ॥
गोष्टप्रांगणरिंगण लोलमनायासं परमायासं ॥ १ ॥

Ends.—fol. 6[a]

Text :— गोविंदाष्टकमेतद्धीते गोविंदार्पित चेता योगो ।
गोविंदाच्युत माधव विष्णो गोकुलनायक कृष्णेति ॥
गोविंदांघ्रि सरोजध्यान सुधाजल धौतसमस्ताघो ।
गोविंदं परमानंदामृतमंतस्थं स समभ्येति ॥ ९ ॥
इति श्रीशंकराचार्यविरचितं गोविंदाष्टकं समाप्तम् ॥

Com. :— इति श्रीशंकराचार्यविरचितं गोविंदाष्टकस्यं आनंदगिरीयं टिप्पणं समाप्तं ॥

References.— See No. 888.

Published in the *Devīstotra Kadamba,* edited by S. Viśvānātha Śāstrī, Madras, 1914.

गोविन्दैकविंशातिक — Govindaikaviṁśatika

No. 892 — 396 / 1887-91.

Size.— $10\frac{3}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 2 leaves ; 12 lines to a page ; 29 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old and worn out ; handwriting somewhat careless and illegible ; borders in double black lines carelessly ruled ; complete.

Age.— Fairly old.

Author.— Bilvamaṅgala.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥
श्रीकृष्णविष्णोमधुकैटभारे भक्तानुकंपिन् भगवान मुरारे ।
त्रायस्व मां केशव लोकनाथ गोविंद दामोदर माधवेति ॥ १ ॥ etc.

Ends. —fol. 2[b]

गोविंद गोविंद हरे मुरारे गोविंद गोविंद मुकुंद कृष्ण ।
गोविंद गोविंद रथांगपाणे गोविंद दामोदर माधवेति ॥ २१ ॥
इति श्रीबिल्वमंगलविरचितं गोविंदैकविंशतिकं संपूर्ण ॥ लिखितं द्विवेदीना सुखानंदेन ॥

References.— Mss. Aufrecht's Cat. Catalo. III, 36[b].

गौरीदशक

Gauridaśaka

No. 893

657
1895-1902.

Size.— $6\frac{1}{4}$ in. by 4 in.

Extent.— 2 leaves ; 7 lines to a page ; 20 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; handwriting bold and legible but somewhat careless and incorrect ; complete.

Age.— Appears to be fairly old.

Author.— Śaṅkarācārya.

Begins.— fol. 1[a]

॥ श्रीगणेशाय नमः ॥
जानकी खलस । हा पहैं ॥
यस्य ज्ञानदयासिंधोरगाधस्यानघागुणाः सेसरसु ॥
श्रीगणेशाय नमः ॥
लीलारब्धस्थापितलुप्ता खिललोकां
लोकातीतैर्योगिभिरंतश्चिरमृग्यां ।
बालादित्यश्रेणि समानद्युति पुंजां गौरीमंबामंबुरुहाक्षीमहमीडे ॥ १ ॥ etc.

Ends. fol. 2[b]

प्रातःकाले भावविशुद्धिं विदधानो ।
भक्त्या नित्यं जल्पति गौरीदशकं ।।
यः वाचा सिद्धिं संततमुच्चैः शिवभक्तिं ।
तस्यावश्यं पर्वतपुत्री विदधाति ॥ ११ ॥
इति श्रीमच्छंकराचार्यविरचितं गौरीदशकं सपूर्णम् ।

References.— Mss. Aufrechts Cat. Catalogorum :—

I, 172[a] ; II, 34[b] ; III 37[a].

Descriptive Catalogues :—

Govt. ori. Mss. Catalogue, Madras, Vol. XVIII, Nos. 9584-87.

गंगापूजाञ्जलिस्तोत्र Gaṅgāpūjāñjalistotra

No. 894 125. / 1891-95.

Size.— $5\frac{1}{2}$ in. by $6\frac{3}{8}$ in.

Extent.— 1 leaf ; 17 lines to a page ; 28 letters to a line.

Description.— Country paper ; Devanāgarī characters; handwriting not quite clear and legible due to slight diffusion of ink ; complete.

Age.— Saṁvat 1907 ; Śaka 1772.

Author.— Śaṅkarācārya.

Begins.— fol. 1[a]

अथ गंगा...जी पुष्पांजलि लिख्यते ।
सगरज तारिणि विश्वविलासिनि भावनिदेवसरेंद्रनुते ।
जलभवजन्म मुरारि हरार्चित पादसरोहतंसगते ॥
कलिकृत कल्मष माशनि तारणि भक्तजने...भावरते ।
जय जय हे हरमौलि विलासिनि पाहि सुधामपहंसगते ॥ १ ॥ etc.

Ends.— fol. 1[b]

श्रुतौ श्रद्धां द्वा गुरुवचन वाचांसृतरसं ।
मुहु पित्वा गंगे परमपदपावन विलसिता ॥
शुचिः शतः शापं पदि पठति नित्यं...वतरे ।
सपुष्पैरंकास्यैस्तव विद्धियै जातिनिलयं ॥ १ ॥

इति श्रीशंकराचार्य्यविरचितं गंगापुष्पांजलि संपूर्ण सं १९०७ शाके १७७२

References.— Aufrecht's Cat. Catalo.
II, 27[b], III, 30[a]

गंगासहस्रनाम — Gangāsahasranāma

No. 895 — 544(1). 1882-83.

Size.— 7 in. by $4\frac{3}{4}$ in.

Extent.— 20 leaves ; 10 lines to a page ; 16 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting bold legible and uniform ; border ruled with double red lines and edges with single. Yellow pigment used for corrections ; the Ms. contains two works :—

(1) गंगासहस्रनाम foll. 1–20[b]
(2) गंगाष्टक ,, 20[b]–21[b]

Age.—Samvat 1899 (1843).

Subject.—Stotra from Skandapurāṇa.

Begins.— fol. 1[b]

॥ ६७ ॥ श्रीगणेशाय नमः ॥ अगस्त उवाच ॥

विना स्नानेन गंगाया नृणां जन्म निरर्थकं ।
उपायांतरमस्त्यन्यद्येन स्नानफलं भवेत् ॥ १ ॥ etc.

Ends.—fol. 20[a]

एतत्स्तोत्रवरं पुण्यं पुरा प्रोक्तं पिनाकिना ।
विष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदं ॥
गंगास्नान प्रतिनिधि स्तोत्रमेतन्मये रितम् ।
सिस्नासुर्जाह्नवी तस्मादेतत्स्तोत्रं जपेत्सुधीः ॥ २१२ ॥

इति श्रीस्कंदपुराणे काशीखंडे गंगासहस्रनामैकोनत्रिंशत्तमोध्यायः ॥२९॥
संवत् १८९९ आषाढ शुक्ला १० रविवासरे लिखितमिदं स्तोत्रम् ॥ श्रीरस्तु

References.— Aufrechts Cata. Catalogorum.—
I, 140[a] ; II, 28[a] ; III, 30[a].
For Des. Cat. See I. O. Cat. Vol. I, part VI, No 3642.

गंगाष्टक Gaṅgāṣṭāka

No. 896 687. 1886-92.

Size.— $7\frac{1}{4}$ in. by $3\frac{3}{4}$ in.

Extent.— 4 leaves ; 6 lines to a page ; 28 letters to a line.

Description.—Country paper ; Devanāgarī characters ; old and worn out; handwriting clear, legible and uniform ; borders ruled with two double black lines having red pigment between them ; beautiful design in the centre of folio 1 ; complete.

Age.— Appears to be fairly old.

Author.— Kālidāsa.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥
नत्वा शंकरपादपद्मयुगलं संसारमोहच्छिदं ।
मायामोहमदायमानलहरी पूर्णं भवांभोनिधिं ॥
तर्तुं कर्तुमहं सुमूढधिषणो वांच्छामि गंगास्तुतिं ।
पंगुस्तालतरोर्यथेच्छति तथा रोढुं फलं वा मनः ।। १ ॥ etc.

Ends.—fol. 4[a]

वाचालं विकलं तथा गतकुलं कामादिकव्याकुलं ।
चंडालं तरलं निपीत गरलं भोखादिकं चाखिलं ॥
कुंभीपाकगतं तमंतकपुरादाच्छिद्य कस्तारये—
न्मातर्न्हुनेरंद्रनंदिनि तव स्वल्पोदबिंदुंविना ॥ २१ ॥
इति श्रीकालिदासविरचितं गंगाष्टकं समाप्तः ॥ श्रीराम

References.— Mss. Aufrechts Catalogus Catalogorum I, 140[a] ; II, 28[a] ; III, 30[a].
Printed in Bṛhatstotraratnākara.

गंगाष्टक Gaṅgāṣṭaka

No. 897 649. 1895-1902.

Size.— 8 in. by $4\frac{1}{5}$ in.

Extent.— 2 leaves ; 9 lines to a page ; 28 letters to a line.

Description.— Country paper ; Devanāgari characters ; old in appearance ; handwriting clear, legible and uniform ; left-hand edges of the folios moth-eaten ; borders ruled with double black lines ; complete.

Age.— Fairly old.

Author.— Ascribed to Śaṅkarācārya.

Begins.— fol. 1[a]

श्रीकृष्णाय नमः ॥

त्रिविक्रमांघ्रिदारितांडखंड भांडपातिनी—
मनंतकष्टदुष्टदुर्विपाक पापशांतिनी ॥
कलिप्रलीन दीनधर्म कर्मशर्म कारिणीं ।
भजेम जह्नुजां जलैरलं मलापकारिणीं ॥ १ ॥ etc.

Ends.— fol. 2[a]

वसामि देवि संततं तवानुकूलकानने ।
स्मरामि नंदनंदनांघ्रि पंकजं वरानने ॥
त्रिकालमंबुविचिभिर्धुनोमि देहजं मलं ।
यथा तथा प्रसीद मे ददाति वांछितं फलं ॥ ११ ॥

इति श्रीशंकराचार्योक्तं गंगाष्टकम्

References.— See No. 896.

Printed in Bṛhatstotraratnākara.

गंगाष्टक Gaṅgāṣṭaka

No. 898 544. (2) 1882-83.

Size.— 7 in. by $4\frac{3}{4}$ in.

Extent.— 20[b] to 21[b] leaves ; 12 lines to a page ; 22 letters to line.

Description.— Country paper; Devanāgarī characters; handwriting bold, legible and uniform; borders ruled with double red lines and edges in single; yellow pigment used for corrections; the Ms. contains two works :—

(1) गंगासहस्रनाम foll. 1–20^{b}

(2) गंगाष्टक ,, 20^{b}–21^{b}

Age.— Saṁvat 1903; Śaka 1768 (= 1847 A. D.).

Author.— Ascribed to Kālidāsa.

Begins.—fol. 20^{b}

श्रीशं वंदे ॥ कालिदासकृत गंगाष्टकं ॥
नमस्तेस्तु गंगे त्वदंगप्रसंगाद्भुजंगाः प्लवंगाः ।
कुरंगास्तुरंगा अनंगारिरंगाः शिवांगासि गंगा ॥
भुजंगाधिपांगी कृतांगा भवंति ॥ १ ॥ etc.

Ends.— fol. 21^{b}

इति गंगाष्टकं कालिदासविरचितं लिखितमात्मारामशर्मणा वाराणस्यां समाप्तं शके १७६८ संवत् १९०३ ज्येष्ठ शुद्ध इंदु वासरे तृतीययामे विश्वामत्रोपाभिधेन ।

Fol. 22^{b} Contains the following endorsement :—

इति गंगासहस्रनाम अथ च कालिदासकृताष्टकं संपूर्णं श्रीशं वंदे ॥

References.— See No. 896.

ग्रंथनामावलि (स्तोत्र) Granthanāmāvali (stotra)

No. 899 275. 1895-98.

Size.— $8\frac{1}{16}$ in. by $3\frac{7}{8}$ in.

Extent.— 2 leaves; 9 lines to a page; 23 letters to a line.

Description.— Country paper, rough, thin and grey. Devanāgarī characters; handwriting medium, legible and uniform. Ms. Contains 12 verses forming the stotra or hymn on the writings of Madhva.

Age.-- Fairly old.

Author.— Ānadatīrtha.

Begins.--fol. 1[a]

श्रीगणेशाय नमः ॥

ग्रंथनामावलि लिख्यते ॥
कृष्णद्वैपायनं नत्वा पूर्णबोधार्य सद्गुरून् ॥
ग्रंथान्मध्वश्चकारासौ सप्तत्रिंशदमंदधीः ॥ १ ॥
गीताभाष्य विधायादौ प्रथमं तुष्टिदं हरेः ।
भाष्याणुभाष्ये चक्रे यद्यणु व्याख्यानमुत्तमं ॥ २ ॥ etc.

Ends.— fol. 2[a]

एतेषां पाठमात्रेण मध्वेशः प्रीयतो हरिः ॥ १२ ॥
इति श्रीमदानंदतीर्थ भगवत्पादाचार्यविरचितं ग्रंथनामावलिस्तोत्रं संपूर्ण ॥
श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥

References.— (1) Mss. —A—Aufrecht's Catalogus Catalogorum :- III 37[a]

घाटपंचक — Ghāṭapañcaka

No. 900 — 192. (iii) / 1887-91

Size.— $5\frac{3}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 25[b] to 27[a] leaves ; 8 lines to a page ; 13 letters to a line.

Description.— See विष्णोर्दिव्य सहस्रनाम No. 192 (i). / 1887-91.

Age.— Fairly old.

Author.— Not mentioned.

Begins.—fol. 25[b]

॥ श्रीमते रामानुजाय नमः ॥

पाषंडद्रुमखंडदावदहनश्चार्वाक शैलाशनि-
र्बौधध्वांत सिरासवासरपतिर्जैनेंद्र कंठीरवः ॥
मायावादिभुजंगभंगगरुडस्त्रैविद्य चूडामणिः ॥
श्रीरंगेश जयध्वजो विजयते रामानुजोयं मुनिः ॥ १ ॥ etc.

Ends.—fol. 26b

पाषंडसागरमहा वडवा मुखाग्निः।
श्रीरंगराज चरणांबुज मूलदासः॥
श्रीविष्णुलोकमणिमंडप मार्गदायी।
रामानुजो विजयते यतिराजराजः॥ ५।
इति श्रीघाटपंचकं संपूर्ण॥

चक्रपाणिस्तोत्र — Cakrapāṇistotra

No. 901 — 652. 1895–1902

Size.— 5⅝ in. by 3⅝ in.

Extent.— 2 leaves; 14 lines to a page; 30 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; handwriting clear, legible and uniform; red and yellow pigment used: borders ruled with double black lines.

Age.— Appears to be fairly old.

Author.— Śaṅkarācārāya.

Begins.—fol. 1a

श्रीगणेशाय नमः॥
नमश्चक्रपाणे हरे वासुदेव प्रभूतेभवारे मुरारे मुकुंद।
हृषीकेशसर्वेशगोविंद तुभ्यं नमो मायिने विष्णवे जिष्णवे ते॥ १। etc.

Ends.—fol. 2a

अयं ते कथामृष्ट पीयूष नद्यां मनोवारणः क्लेशदावाग्निदग्धः।
तृषार्त्तो विगाढो न सस्मार दावं न निःक्रामति ब्रह्मसंपन्नमग्नः॥ १८॥
इति श्रीशंकराचार्यविरचितं चक्रपाणिस्तोत्रं संपूर्ण॥ श्रीकृष्णाय नमः॥
Then follow some stanzas.

References.—Mss.—Aufrecht's Cat. Catalo. I, 175a.

चतुर्वर्णगायत्री Caturvarṇagāyatrī

No. 902 319 (iii). 1879-80.

Size.— $8\frac{5}{8}$ in. by $4\frac{3}{8}$ in.

Extent.— 1[a] ; 7 lines to a page ; 25 letters to a line.

Description.— Country paper ; Devanāgarī Characters ; old in appearance ; handwriting clear and legible ; text bounded on all sides with decorated lines ; complete.

Age.— Fairly old.

Author.— Not mentioned.

Begins.--fol. 1[a]

ॐ नमः सरस्वत्यै ॥ अथ ब्रह्मगायत्री ॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात ॥ इति ब्रह्मगायत्री ॥ etc.

Ends.— fol. 1[b]

जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥
नमस्तेस्तु हृषीकेश महापुरुषपूर्वज ॥
इति शूद्रगायत्री ॥ इति चतुर्वर्णगायत्री संपूर्णः ॥ शुभम् ॥

चतुःश्लोकी Catuḥślokī

No. 903 110 (xvii). 1895-98

Size.— $5\frac{1}{4}$ in. by $8\frac{1}{8}$ in.

Extent.— fol. 18[a] to 18[b] ; 13 lines to a page ; 12 letters to a line.

Description.-- For descripton see वल्लभाष्टक No. 110 (i) 1895-98

Age.— Fairly old.

Author.— Not mentioned.

Begins.—fol. 18[a]

श्रिकृष्णाये नमः श्रिगोपिजनवल्लभाये नमः ।
श्रिविट्ठलेस्वराये नमः अथ श्रिचतुश्लोकि लिख्यते ॥

सर्व्वदासत्यभावेन भजति यो प्रजाधिपः ॥
स्वस्यामेव धर्मोहि नान्य कापि कदाचनः ॥ १ ॥
एवं सदा स्वकर्त्तव्यं स्वमेव करिष्यति ॥
प्रभुः सर्वसमर्थो हि ततो निश्चिततां व्रजेत् ॥ २ ॥

Ends.—fol. 18[b]

अतः सर्व्वात्मना शश्वद्गोकुलेश्वरपादयो ।
स्मरणभजनं चापि न त्याज्यमिति मे मति ॥ ४ ॥
इति श्रीचतुश्लोकि संपूर्ण ।

References.— See No. 904 below.

चतुःश्लोकी

Catuhśloki

No. 904

192 (iv)
1887–91

Size.— $5\frac{3}{4}$ in. by $3\frac{7}{8}$ in.

Extent.— 27[a] to 28[b] leaves ; 8 lines to a page ; 13 letters to a line.

Description.— See विष्णोर्दिव्यसहस्रनाम No. 192 (i) / 1887–91

Age.— Fairly old.

Author.— Not mentioned.

Begins.--fol. 27[a]

॥ श्रीरामानुजाय नमः ॥

कांतस्ते पुरुषोत्तम स्फणिपतेः शय्यासनं वाहनं ।
वेदात्मा विहनेश्वरो जवनिका माया जगन्मोहिनी ॥
ब्रह्मेशादि सुरव्रजः सदयितस्त्वद्दासदासीगणः ।
श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयं ॥ १ ॥ etc.

Ends.--fol. 28[b]

शांतानंत महाविभूति परमं यद्ब्रह्मरूपं हरे- ।
मूर्त्तं ब्रह्म ततोपि यत्प्रियतरं रूपं यदत्यद्भुतं ॥
यान्यन्यानि यथासुखं विहरते रूपाणि सर्वाणि ता ।
न्याहुः स्वैरनुरूपरूपविभवैर्गाढोपगूढावि ते ॥ ४ ॥

अकारत्रयसंपन्नामरविंदानिवसिनां ।
अशेष जगदीशित्रीं वंदे वरदवल्लभं ॥ ५ ॥
इति श्रीचतुःश्लोकी ॥

References :—Mss. Aufrecht's Cat. Catalogorum II, 36.

Descriptive Catalogues :—Govt. Ori. Mss. Lib. Cat. Madras Vol. XVIII. Nos. 9711-9727.

चर्पटपंजरिका स्तोत्र — Carpaṭapañjarikā-Stotra

No. 905 — 500. 1891-95.

Size.— $15\frac{3}{8}$ in. by $7\frac{1}{4}$ in.

Extent.—1 leaf ; 27 lines to a page ; 21 letters to a line.

Description.— Country paper dark grey, discoloured and musty Devanāgarī Characters ; handwriting large, bold and clear. Paper strengthened by pasting on another sheet at the centre of the b-face. Carelessly written and full of mistakes.—

Age.— Fairly old.

Author.— Śaṅkarācārya.

Begins.-- fol. 1[a]

श्रीगणेशाय नमः ॥
दिनमपि रजनि सायंप्रातः शशिरवसंतः पुनरागतः ।
कालः क्रिडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १ ।
भज गोविंदं भज गोविंदं गोविंदं भज मूढमते ।
प्राप्ते संनिहिते मरणे नहि नहि रक्षति डुकृञ् करणें ॥ २ ॥

Ends.--fol. 1[b]

कुरुते गंगासागर गमनं व्रतपरिपालनमभयादानं ।
ज्ञानविहिने मोक्षं नही नही मुचति न भवति जन्मशतेनः ॥
इति श्रीशंकराचार्यविरचितं चर्पटपंजरीका स्तोत्रं संपूर्णमस्तु ॥छ॥छ॥छ॥

References.— (1) Mss.— A-Aufrecht's Catalogus Catalogorum:— I, 184[b]. III, 39[b] (चर्पटमंजरी of Śaṅkarācārya)

(2) Printed Editions :— Vani Vilas Press Edition. 1910. —Translated by J. N. Paramanand into English in " A Compendium of Rajayoga Philosophy, " Bombay [2nd ed. 1901].

चर्पटशतं

Carpaṭaśata

No. 906

806-B
1886-92

Size.— $9\frac{1}{2}$ in by $4\frac{1}{4}$ in.

Extent.— 5 leaves ; 14 lines to a page ; 37 letters to a line.

Description.— Country paper thin, rough, dark grey and worn-out. Devanāgarī Characters ; handwriting medium, clear and uniform, Borders ruled with double black lines ; punctuation marks enclose verse numbers. Forms continuation of another work called शिष्य शिक्षा (No. 806-A of 1886-92).

Age.— Saṁvat 1688.

Author.— (Śaṅkarācārya)

Begins.—fol. 1[b]

॥ श्रीकृष्णाय मनः ॥
श्रीसर्वज्ञं नत्वादेवं सकलसुरासुरविरचितसेवं ॥
वक्ष्ये किंचित्तदनुचरोहं सुंचति येन विवेकी मोहं ॥ १ ॥
वर्जित दुष्ट सहायमहोभिः परिहरभाषाकायमनोभिः ॥
षड्विधजीवनिकायविनाशं संसृति चारुकबंधन पाशं ॥ २ ॥ etc.

Ends.--fol. 5[a]

कोहं कस्त्वं कथमायातः का मे जननी को मे तातः ॥
इति परिभावयतः संसारः सर्वोयं स्वप्न व्यवहारः ॥ ९९ ॥
वर्णोच्चारण करणविहीनं यदिदं गुरु संकेते लीनं ॥
स्वयमुन्मीलति यस्य ज्ञानं पुनरपि तस्य न गर्भाधानं ॥ १०० ॥
इति चर्पटशतं संपूर्णं संवत् १६८८ वर्षे आषाढ मासे शुक्लपक्षे पूर्णिमायां तिथौ शनिवासरे लिपीकृता शाकीभरीमध्ये ॥ कल्याणमस्तु ॥

References.— (I) Mss.— A- Aufrecht's Catalogus Catalogorum :-- II 37[b], III 39[b] (चर्पटमञ्जरी)

चिदम्बराष्टक — Cidambarāṣṭaka

No. 907 — 151. / A 1881-82.

Size.— $8\frac{3}{8}$ in by 4 in.

Extent.— 1 leaf; 10 lines to a page; 24 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī Characters; handwriting clear, legible and uniform; Borders ruled in double red lines; complete.

Age.— A Modern copy.

Author.— Ananta, son of Vināyaka Sūri.

Begins.—fol. 1[a]

श्रीचिदंबराय नमः ॥
यः पार्थिवेन वपुषा जगदेतदाद्यो ।
धत्ते निजात्मजनितौषधिजातकेन ॥
आप्याय यत्यपि परावर ईड्यरूप- ।
स्तस्मै नमः शिव चिदंबर तेस्तु नित्यं ॥ १ ॥ etc.

Ends.—fol. 1[b]

चिदंबराष्टकमिदं सद्यः कष्टविनाशिकृत ।
अहर्दिवमधीते यस्तद्विधेयश्चिदंबरः ॥ १० ॥
इति श्रीविनायसूरिसून्वनन्तविरचिते श्रीचिदंबराष्टकं संपूर्णम् ॥
श्रीचिदंबर प्रियताम् ॥

चिन्तामणिपूजाजयमालास्तोत्र — Cintāmaṇipūjājayamālā stotra

No. 908 — 616 (a). / 1899-1915.

Size.— $9\frac{7}{8}$ in. by $5\frac{3}{8}$ in.

Extent.— 44[a]-44[b] leaves; 10 lines to a page; 31 letters to a line.

Description.— Country paper; Devanāgarī characters; handwriting clear, legible and uniform; borders and edges ruled with

red lines ; the Ms. contains the following stotras :—

(1) चिन्तामणिपूजाजयमाला स्तोत्र fol. 44^a-44^b

(2) पद्मावती पूजास्तोत्र foll. 44^b-50^b.

Age.— Samvat 1906 ; (= A. D. 1850).

Author.— Not mentioned.

Begins.—(abruptly) fol. 44^a

चिन्तामणि चिन्तितकामरूपं ।
पार्श्वं फणे नौमि निरस्तपापं ॥ १ ॥ etc.

Ends.— fol. 44^b

इति नागेन्द्रनरामरवंदित पादांबुज प्रवरतेजाः ।
देवकुलवाटकस्थः स जयति चिंताभाणि पार्श्वनाथः ॥
इति श्रीचिंतामणिपूजाजयमालास्तोत्र संपूर्ण

चौरचर्या

Cāuracaryā

No. 909

174 (i).
1892-95.

Size.—$11\frac{1}{2}$ in. by $5\frac{1}{2}$ in.

Extent.— 1^a-2^b leaves ; 13 lines to a page ; 44 letters to a line.

Description.— Country paper, Devanāgarī characters ; handwriting clear and legible ; the Ms. contains the following works :—

(i) चौरचर्या . foll. 1^a-2^b

(ii) विज्ञप्ति ,, 3^a-9

(iii) नामरत्नस्तोत्र ,, 9-10

(iv) गिरिधार्याष्टक ,, 10

(v) दशमस्कन्धानुक्रमणिका ,, 11-12

Age.— Appears to be fairly old.

Author.— Viṭṭhaleśvara Dikṣita.

Begins.—fol. 1^a

श्रीगोपीजनवल्लभाय नमः । अथ चौर्यचर्या ।
सदा सर्वात्मभावेन भजनीयो व्रजेश्वरः ।
करिष्यति स एवास्मदैहिकं पारलौकिकं ॥ १ ॥ etc.

Ends.— fol. 2[b]

अयं मनोरथोन्यत्र भविता नैव पूरकः
नान्यः श्रीगोकुलाधीशात् ज्ञाताप्यन्योन्य मां विना ॥ ४९ ॥

इति श्रीमद्विट्ठलेश्वरदीक्षितविरचिता चौरचर्या समाप्ता ॥ लिखितं दवे हरिनंदाख्येणेयं ॥

References.—Aufrecht's Catalogus Catalogorum. III, 41[a]
This is the only Ms. recorded by Aufrecht.

जयशंकरस्तोत्र — Jayaśaṅkara stotra

No. 910 — 659. 1895–1902.

Size.— 8½ in. by 4 in.

Extent.— 3 leaves; 7 lines to a page; 28 letters to a line.

Description.—Modern paper with water-marks; Devanāgarī characters; handwriting clear, legible and uniform.

Age.— Śaka 1735 (=A. D. 1813)

Author.—Upamanyu.

Begins.—fol. 1[b]

श्रीगणेशाय नमः ॥
जयशंकरपार्वतीपते वृडशंभो शशिखंडमंडन ।
मदनांतकभक्तवत्सलप्रिय कैलासदया सुधांबुधे ॥ १ ॥ etc.

Ends.— fol. 3[b]

शंकरस्य चरितं रसामृतं चंद्रशेखरगुणानुकीर्त्तनं ।
नीलकंठ तव पादसेवनं संभवंतु मम जन्म जन्मसु ॥ २० ॥
कदा शयानो मनकर्णिकायां कर्णे जवत्यक्षरमिंदुमौलौ ।
अवाप्य मुद्रां गतमोहनिद्रां नालोकयिष्यामि पुनः प्रपंचं ॥ २१ ॥

इति उपमन्युविरचितं जयशंकरस्तोत्र संपूर्णमस्तु ॥ शके १७३५ श्रिमुखाब्दे माघ कृष्ण ७ गुरौ रात्रै संपायतां ॥ हस्ताक्षर मयुरेश्वरेण लिखितं श्रीरस्तु ॥ श्रीविश्वेश्वराय नमः ॥

References.— Govt. Ori. Mss. Lib. Cat. Madras. Vol. Nos: XIX. 10934 & 10935.
Printed in Brhatstotraratnakara, p, 15

जलभेद Jalabheda

No. 911 $\frac{110\ (v)}{1895-98}$.

Size.— 5¼ in. by 8⅛ in.

Extent.—fol. 9[b] to 11[b] leaves ; 13 lines to a page ; 12 letters to a line.

Description.— For description see वल्लभाष्टक No. $\frac{110\ (i)}{1895-98}$.

Age.— Fairly old.

Author.—Vallabhācārya.

Begins.— fol. 9[b]

॥ श्रीकृष्णाये नमः ॥
नमस्कृत्य हरिं वक्ष्ये तद्गुणानां विभेदकान् ।
भवान् विंसंतिधा भिन्नान् सर्वसंदेहवारकान् ॥ १ ॥ etc.

Ends.--fol. 11[b]

उद्धृतोदकवत्सर्वे पतितोदकवत्तथा ।
उक्तानि रक्तवाक्यानि फलं चापि तथा ननः ॥ २० ॥
इति जीवेंद्रियगता नानाभावं गता भुवि ।
कृतः मूलश्चैव गुणा विष्णो निरूपिताः ॥ २१ ॥
इति श्रीवल्लभाचार्यविरचितं जलभेदः संपूर्णं ॥

References.— Mss. —Aufrecht's Catalogus Catalo. I, 202[b] ; II, 41[a] ; III 43[b].

जुगलभावना

Jugalabhāvanā

No. 912

689 (iv).
1895-1902.

Size.— $11\frac{1}{4}$ in. by $5\frac{1}{2}$ in.

Extent.— fol. 3^b to 16^a leaves ; 8 lines to a page : 18 letters to a line.

Description.— For Description see No. $\frac{689\ (i).}{1895-1902.}$.

Age.— fairly old.

Author.— Saraṇagosvāmi.

Begins.—fol. 3^b

श्रीरासिकेश्वरो जयतां ॥
आनंदमूर्त्तिर्जयति वृषभानुसुता सति ।
यत्पादांबुरुह द्वंद्व सेवतां स हि सन्मुखी ॥ १ ॥
श्रीराधिकां रहस्यं हि जानंति तत्सखीजना ।
तासां प्रसादयोग्या ये ज्ञात्वा गायंति तत्सुखं ॥ २ ॥ etc.

fol. 5^b इति श्रीजुगलभावनायां प्रथमाविंशतिका ॥

fol. 8^b इति श्रीद्वितीयविंशतिका ॥

fol. 10^b इति तृतीय विंसतिका ॥ ३ ॥

Ends.—fol. 16^a

श्रीरूपमंजरि प्रेष्टा प्रियायाः निरतं हरे ।
करोति सेवां रुचिरां मानसिं प्रमुदा वहां ॥ ४५ ॥
श्यामा प्रिया तदनुचराधिका दासिका सदा कुरुते ।
भावनां नित्यां रसदां सततं सतां ॥ ४६ ॥

इति श्रीमत्सर्वेश्वर सरणगोस्वामिना विरचिता जुगलभावना समाप्ता ॥ ॥ ॥

संवत् १८ मिति आगण सुदि १ पड्यां संपूर्णः सुभं भूयात् श्रीराधा-कृष्णौ जयतां ॥

ज्वालामालिनी स्तोत्र — Jvālāmālini Stotra

No. 913 — 965 (2). 1884–87.

Size.— $10\frac{1}{8}$ in. by $4\frac{5}{8}$ in.

Extent.—fol. 4^a to 5^a leaves : 10 lines to a page; 28 letters to a line.

Description.— See महाविद्यास्तोत्रमंत्र No. $\frac{965 (i)}{1884–87}$.

Age.— Appears to be old.

Begins.—fol. 4^a

॥ ६० ॥ अथ ज्वालामालनी स्तोत्र लिष्यते ॥

ॐ नमो भगवते श्रीचंद्रप्रभजिनेंद्राय शशांकसंषगोक्षीरधवलगात्राय । घातिकर्म निर्मूलोच्छेदन कराय । etc.

Ends.—fol. 5^a

चंद्रहासशस्त्रेण छेदय । भेदय । उरु । छरु । हरु स्फुटं स्फुट घे घे क्रां क्रीं क्षीं क्षूं क्षी क्षौं

ज्वालामालिनीज्ञापयते स्वाहाः ॥

इति ज्वालामालनीस्तोत्र संपूर्ण ॥ १ ॥

तीर्थवर्णन — Tirthavarnana

No. 914 — 209 (v). 1891–95.

Size.— 6 in. by $4\frac{1}{8}$ in.

Extent.— 5^b to 10^b ; 8 lines to a page ; 28 letters to a line.

Description.— For description see No. $\frac{209 (1)}{1891–95}$ incomplete.

Age.— A modern copy.

Author.— Not mentioned.

Begins.—fol. 5^b

ॐ अगस्त्युवाच ॥

एतद्भविष्यं श्रुत्वाहं व्यासस्य शिवनन्दन ।

साश्चर्यभाजनं जातस्तीर्थानि कथयाधुना ॥ १ ॥ etc.

Ends.—fol. 10[b]

तस्तंभं समलंकृत्य नरस्तत्पदमाप्नुयात् ।
तत्रैव तीर्थे परमं कपालेशसमीपतः ॥ ६५ ॥

कपालमोचनं नाम

तुलजासहस्रनामस्तोत्र — Tulajāsahasranāmastotra

No. 915 — 568. 1892–95.

Size.— 9½ in. by 4¼ in.

Extent.—12 leaves ; 9 lines to a page ; 29 letters to a line.

Description.— Country paper ; Devanāgarī Characters ; handwriting clear and legible but not uniform ; borders ruled in double black lines ; yellow pigment occasionally used for corrections ; complete.

Age.— Saṁvat 1759 (= A. D. 1703)

Author.— Not mentioned.

Begins.—fol. 1[b]

श्रीगणेशाय नम ॥ श्रीतुलजायै नमः ॥ श्रीगुरुपादुकाभ्यां नमः ॥
श्रीशंकर उवाच ॥
नामानि ते प्रवक्षामि तुलजायाः सुभानि च ।
एतानि प्रपठेद्विद्वान् नमोंतानि मुनीस्वर ॥ १ ॥

एवं गुण विशेषेण विसिष्टायां पुण्यतिथौ मम समस्त पापक्षयार्थे श्रीतुलजासहश्रष्टानाम जपमहं करिष्ये ॥ etc.

Ends.—fol. 12[b]

भवे त्रैलोक्य जठरे देवैरपि सूपूजितः ।
किमत्र बहुनोक्तेन देवी सायुज्यमाप्नुयात् ॥ ३५ ॥
इतीदं कथितं विप्र देव्या नाम सहस्रकं ।
अधिस्वावहितो भूत्वा सर्वकामैस्तु पूज्यसे ॥ ३६ ॥

इति श्रीस्कंदपुराणे सह्याद्रिखंडे तुलजामहात्मे संकरवासिष्ठसंवादे तुलजासहस्र नाम स्तोत्रं संपूर्ण ॥ सं. १७५९ वर्षे अस्विन मासे कृष्णपक्षे

तिथौ १ गुरुवार रात्रौ मध्ये सूरतिबंदरमध्ये लिषतं व्यास बकसरासदधीच उतननरणा नगरास्षे स्वपठनार्थे ॥

References :—Mss. Aufrecht's Cat. Catalogorum I, 233[a] ; III, 50[b].

त्रिपुरसुन्दरीमहिमन्

Tripurasundarimahiman

No. 916

358.
1884-87.

Size.— $7\frac{1}{3}$ in. by $3\frac{3}{4}$ in.

Extent.— 7 leaves ; 12 lines to a page ; 30 letters to a line.

Description.— Country paper ; Devanāgarī Characters ; old in appearance ; handwriting small but legible and uniform ; borders ruled with double black lines : complete.

Age.— Appears to be fairly old.

Author.— Durvāsa.

Begins.—fol. 1[a]

श्रीगणेशाय नमः ॥

अमिताम्भ्रिदुगे etc. as in No. 917.

Ends.-fol. 7[a]

सदसदनुग्रहनिग्रहविग्रहित मुनि विग्रहो भगवान् ।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ॥ ५२ ॥

इति दुर्वासाविरचित सुंदरीणा महिम्नं ॥ श्रीरस्तु ॥

राजकुल रघुपत्यात्मज रावल आनंदरामस्येदं महिम्नस्तोत्रं ॥
in a different hand.

References.— Mss. Aufrecht's Cat. Catalo. II, 50[b] ; III, 51[b].
Printed in Kāvyamālā, 1895.

त्रिपुरसुन्दरीमहिम्नस्तोत्र with टीका

Tripurasundarimahimnastotra with Commentary

No. 917 — 1011. / 1884-87.

Size.— $9\frac{3}{4}$ in. by $4\frac{3}{8}$ in.

Extent.— 32 leaves ; 11 lines to a page ; 32 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; handwriting clear, legible and uniform but incorrect ; borders ruled with double red lines; red and yellow pigment frequently used ; complete ; foll. 31–32 slightly moth-eaten.

Age.— Appears to be fairly old.

Author (of the text).—Durvāsa.

,, (,, ,, comm.).— Not mentioned.

Begins.—(text) fol. 1^b

श्रीमातस्त्रिपुरो पदात्परतरे देवि त्रिलोकी महा
सौंदर्यार्णव मंथनोद्भवसुधा प्राचुर्य वर्णोज्वलं ।
उद्यद्भानुसहस्रनूतनजया पुष्पप्रभं ते वपुः
स्वांते मे स्फुरतु त्रिलोक निलयं ज्योतिर्मयं वाङ्मयं ॥ १ ॥ etc.

,, (com.) ॥ श्रीगणेशाय नमः ॥ श्री । श्री ॥

विद्यानंदनाथांघ्रियुग्मं स्मृत्वा स्वांतध्वांत भानुप्रभावं ।
सर्वोत्कृष्टं क्रोधभट्टारकोक्तं स्तोत्रं श्रीमत्सुंदरी श्रीमहिम्नं ॥ १ ॥

Ends.— (text) fol. 31^b

उच्चेषु नीचेष्वपि दर्शनेषु प्रकाशते देवि तव स्वरूपं ।
समुज्वलत्येव हि यज्ञ वाटे चंडालवेश्मन्यपि जातवेदाः ॥

,,(com.)— तत्वनिरूपकाणां जयति सर्वोत्कर्षेण विहरति ।

देशिकः प्रथमः आद्यः आचार्यः ॥ ५८ ॥
इति त्रैपुरं श्रीमहिम्नं गुरूक्त्या ।
मया व्याकृतं प्रीतये सिद्धये च ॥

[15...Stotra]

सतां साधकानां सुविद्येः सुधीरै-
श्चिरं लोकनीयं हृदा निश्चलेन ॥ ५९ ॥
श्रीरामेति ॥ ॥

References.— See No. 916.

Printed in Kāvyamālā, 1895.

त्रिपुरसुन्दरीस्तोत्र — Tripurasundarīstotra

No. 918 — 663. 1895–1902.

Size.— 11¼ in. by 4⅛ in.

Extent.— 12 leaves ; 11 lines to a page ; 37 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear, legible and uniform ; portion on some folios scratched out probably due to the sticking of folios ; fol. 12 mended with paper slips ; complete.

Age.— Saṁvat 1908 (?)

Author.— Śaṅkarācārya.

Begins.— fol. 1ᵃ

श्रीगणेशाय नमः ॥ ॐ नमो त्रिपुरसुंदर्यै ॥
मम न भजनशक्तिः पादयोस्तेन भक्ति-
र्नच विषयविरक्तिर्ध्यानयोगेन शक्तिः ।
इति मनसि सदाहं चिन्तयन्नाथशक्ते
रुचिरवचनपुष्पैरर्चनं संतनोमि ॥ १ ॥ etc.

Ends.—folio 12ᵃ

विमलीकृते मुहुश्चित्प्रतिबिंम्बानंदनाथचरणेन
.....दर्पणेस्मिन्प्रतिफलिता भावना तेषां ॥ १२९ ॥
मित्यार्चनमिदं चित्ते भाव्य.....
.....या निपद्धविविधैः पद्यैरनुगृह्णातु सुंदरी ॥ १३० ॥

